' आह्वानसुलभ '= ' सुहवा.' म्हणजे भक्तांनीं हाक मारितांच त्यांला पावणारी.

' आमच्या घरीं '=' अस्मासु. ' म्हणजे मी जो स्तोता आहें, त्या मज कक्षीवंताच्या घरीं. अथवा हवि अर्पण करणारा जो मी, त्या मज कक्षीवंताच्या येथें असा अर्थ करावा. मग यजमान वेगळे राहिले नाहींत.

वृत्तसुखासाठीं तिसऱ्या चरणांत 'वि उच्छ ' असें वाचावें, आणि तिसरा आणि चवथा या चरणांमध्यें संधि करूं नये.

सूक्तम् १२४.

दैर्घतमसः कक्षीवान् ऋषिः । उषा देवता । त्रिष्टुप् छन्दः ॥

उषा उच्छन्ती समिधाने अग्ना उद्यन्त्सूर्य उर्विया ज्योतिरश्रेत् ।
देवो नो अत्र सविता न्वर्थं प्रासावीद्द्विपत्प्र चतुष्पदित्यै ॥ १ ॥

उषाः । उच्छन्ती । सम्ऽइधाने । अग्नौ । उत्ऽयन् । सूर्यः । उर्विया । ज्योतिः । अश्रेत् ।
देवः । नः । अत्र । सविता । नु । अर्थम् । प्र । असावीत् । द्विऽपत् । प्र । चतुःऽपत् । इत्यै ॥ १ ॥

भाषायाम्.

१. उषा उच्छन्ती (=तमो निवारयन्ती सती) [आगच्छति] । अग्नौ समिधाने (=समिद्धे सति) उद्यन् (=उदयं प्राप्नुवन्) सूर्यो ज्योतिः उर्विया अश्रेत् (=स्वप्रकाशं विस्तीर्णं यथा तथाश्रयति) । अत्र (=अस्मिन् कालेपि) अर्थं (=गमनीयं=कर्म प्रति) नु (=क्षिप्रम्) इत्यै (=गन्तुं=यथा वयं सर्वे स्वस्वकार्याणि प्रति क्षिप्रं गच्छामस्तथा) नः (=अस्मान्) द्विपत् (=पादद्वययुक्तं प्राणिजातं) चतुष्पद् (=पादचतुष्टययुक्तं प्राणिजातं च) सविता प्रासावीत् (=तमसः सकाशात् प्रेरितवान् =मोचितवान् भवति) ॥

सायणस्तु । एषोषाः समिधानेऽग्नौ । अग्नित्वसामान्येनैकवचनम् । अग्निषु समिध्यमानेषु सत्सु । कर्मार्थे कर्तृप्रयोगः । उषःकाले ह्याहवनीयादयः प्रज्वाल्यन्ते । उच्छन्ती तमो विवासयन्त्युर्वियोरु बहुलं ज्योतिः प्रकाशमश्रेत् । सेवते । प्रकाशते प्रकाशयति वा सर्वम् । किमिव । उद्यन् सूर्यः । उपमाप्रधाननिर्देशः । उदितः सूर्य इव । सूर्यो यथा प्रकाशयति तथेत्यर्थः । अत्र त्वदुदयानन्तरमस्मिन्कर्मणि वा सविता देवः सर्वस्य प्रेरकः सूर्यो नोऽस्मदर्थं नु क्षिप्रमर्थम् । अर्थशब्दोऽत्र विशेषणवाची नपुंसकलिङ्गः । अयन्नर्थानि कृणवन्नपांसीत्यादौ । ऋ. ७. ४. ८ । तथा दृष्टत्वात् । अरणीयं द्विपत् पादद्वयोपेतं मनुष्यादिरूपं धनं प्रासावीत् । अनुजानातु । ददात्वित्यर्थः । तथा चतुष्पत् पादचतुष्टयोपेतं गवादिरूपं धनं प्रासावीत् । किमर्थम् । इत्यै । द्विपदां चतुष्पदां च गमनाय । यद्वा न इत्या इति संबन्धः । अस्मद्गमनागमनादिव्यापारायेत्यर्थः ॥

सूक्त १२४.

ऋषि–दीर्घतमा याचा पुत्र कक्षीवान् (पूर्वसूक्ताचा जो कर्ता तोच). देवता–उषा. वृत्त–त्रिष्टुभ्.

१. उषा उजेडत [येत आहे]. अग्नि प्रज्वलित केला आहे; आणि नुक्ताच उगवणारा सूर्य आपलें तेज विस्तीर्ण प्रदेशीं उंच फेकीत आहे. आणि या प्रसंगीं देदीप्यमान सवित्यानें आम्हांला, द्विपदांला, आणि चतुष्पदांला लवकर आपापल्या कामीं जाण्यासाठीं अंधकारांतून मुक्त केलें आहे.

Hymn 124.

To *Ushas.* By *Kakshîvân,* the son of *Dîrghatamas* (author of the previous hymn). Metre—*Trishṭubh.*

1. Ushas [is come] dawning. Agni being kindled, the sun has sent forth its light on high. Now divine Savitâ has brought us forth [from darkness]—us, the bipeds and the quadrupeds, that we may quickly go to our work.

---

१. हेंहि सूक्त कक्षीवान् ऋषीचेंच असून उषेविषयींच आहे. परंतु या पहिल्या मंत्रांत केवळ उषःकाळाचें वर्णन नसतां, प्रातःकाळाचें वर्णन आहे. ऋषि प्रातःकाळाला अनुलक्षून म्हणतोः–‘उषा प्रकाशत प्रकाशत उगवली आहे. आम्हीं आपले अग्नि पेटविले आहेत. सूर्य आपले बालकिरण क्षितिजाच्या खालूनच अंतरिक्षाच्या अत्युच्च प्रदेशीं फेकीत आहे. आणि आम्हीं आणि सर्व द्विपद सृष्टीनें आणि चतुष्पाद सृष्टीनें लवकर उठून आपआपल्या कामीं जावें म्हणून, सवित्यानें आम्हां सर्वांला अंधकारांतून मुक्त करून पुनर्जन्म जणुं दिलें आहे.’

‘ विस्तीर्ण प्रदेशीं उंच फेकीत आहे ’ =‘ उर्विया अश्रेत्.’ म्हणजे संकुचित करून पूर्वी धरीत होता, तसें आतां करीत नाहीं, तर दूर पसरून धरीत आहे.

सायणांनीं वेगळा अर्थ केला आहे तो भाषेखालीं उतरून घेतला आहे.

‘ अंधकारांतून मुक्त केलें आहे ’= ‘ प्रासावीत्.’ अक्षरशः ‘[पुनः] उत्पन्न केले आहेत, ’ रात्रीं जणुं नाहींसे झालों होतों त्या आम्हांला पुनः जन्मास आणिलें आहे.

वृत्तासाठीं तिसऱ्या पादांत ‘ नु अर्थम् ’ असें वेगळें वाचलें पाहिजे.

अमिनती दैव्यानि व्रतानि प्रमिनती मनुष्या युगानि ।
ईयुषीणामुपमा शश्वतीनामायतीनां प्रथमोषा व्यद्यौत् ॥ २ ॥

अमिनती । दैव्यानि । व्रतानि । प्रऽमिनती । मनुष्या । युगानि ।
ईयुषीणाम् । उपऽमा । शश्वतीनाम् । आऽयतीनाम् । प्रथमा । उषाः ।
वि । अद्यौत् ॥ २ ॥

एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात् ।
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥ ३ ॥

एषा । दिवः । दुहिता । प्रति । अदर्शि । ज्योतिः । वसाना । सम-
ना । पुरस्तात् ।
ऋतस्य । पन्थाम् । अनु । एति । साधु । प्रजानतीऽइव । न । दिशः ।
मिनाति ॥ ३ ॥

भाषायाम्.

२. दैव्यानि व्रतानि (=देवसंबन्धीनि कर्माणि) अमिनती (=अहिंसन्ती=परि-पालयन्ती) मनुष्या युगानि (=मनुष्याणि=मनुष्याणाम् आयूंषि) प्रमिनती (=हिंसन्ती=क्षपयन्ती) [अपि च] ईयुषीणां (=गतवतीनां) शश्वतीनाम् (=असंख्यातानाम्) उपमा (=समीपतमा) आयतीनाम् (=आगामिनीनां) प्रथमा [एषा] उषाः वि अद्यौत् (=विशेषेण प्रकाशितवती पश्य पश्य) ॥

३. ज्योतिर्वसाना (=ज्योतीरूपं वस्त्रं परिदधाना) दिवो दुहिता (=द्युरूपस्य देवस्य दुहितृभूता) एषा [उषाः] समना (=समानकाले=द्यो यस्मिन्कालेदर्शि तस्मिन्नेव काले) पुरस्तात् (=पूर्वस्यां दिशि) प्रत्यदर्शि (=पुनरपि दृश्यते पश्य पश्य) । [सा] प्रजानतीव (=काचिद् गन्तव्यान् प्रदेशान् प्रकर्षेण जानती यथा तथा) [इयम्] ऋतस्य पन्थां (=सत्यभूतस्य आदित्यस्य सवितुर्वरुणस्य वा मार्गम्) अनु[लक्ष्य] साधु (=सुष्ठु) एति (=गच्छति) । दिशो न मिनाति (=दिशो न बाधते=पूर्वदिगन्यदिशि दर्शनाद्दिशां वैपरीत्यं यथा स्यात्तथा न करोति अपि तु दिशां परस्परसंबन्धो यथा यथायथं शिष्येत तथैव चरति) ॥

समनेत्यत्र समना सम्यग्मनयित्री चेष्टयित्री । ...... । यद्वा सह युगपदेव मन्यतेऽवबुध्यते प्राणिभिरिति समना । व्युत्पत्त्यनवधारणादनवग्रहः । सा तादृशी ऋत-

२. देवांचे नियम पाळणारी, मनुष्यांचीं आयुष्यें हरण करणारी, येऊन गेलेल्या असंख्य [उषां]तून शेवटची, [आणि] येणाऱ्या [उषां]तून पहिली, [अशी ही] उषा प्रकाशली आहे [पहा].

३. प्रभा[रूप वस्त्र] नेसलेली ही द्यूची कन्यका नेहमीच्याच वेळीं पूर्वेस पुन: प्रकाशली आहे [पहा]. ही आदित्याच्या मार्गानें मार्ग ठाऊक असलेल्या एकाद्या स्त्रीसारिखी नीट चालते, दिशांला बाध आणीत नाहीं.

2. Not violating the ordinances of the gods, stealing away the life of men, this Ushas, the last of those numberless [Ushases] that have gone by, [and] the first of those of the future, has shone forth.

3. Clad in effulgence, this daughter of Heaven has appeared in the east at the same time [as before]. Like one well-acquainted with the regions, she goes along the path of the Âditya, faithfully observing [the relations of] the quarters of the globe.

---

२. 'सवित्याच्या पूर्वीं उषेनें उगवावें; आणि उगवतांच देवभजकांस प्रकाश द्यावा, की जेणेंकरून ते देवोपासनेंत एकदम तत्पर होतील; उषेनें उगवल्यानंतर फार वेळ राहूं नये, लवकर निघून जावें; प्रकाशावें तें कोमळ प्रकाशानें प्रकाशावें; इत्यादि जे नियम, ते उषा मोडीत नाहीं, तर ती ते पाळिते. पण ती जसजशी दरदिवस येऊन जाते तसतशी ती मनुष्यांचीं आयुष्यें हरण करिते. अशी जी ही आजची उषा, कीं जी होऊन गेलेल्या अनंत उषांपैकीं शेवटची, आणि पुढें येणाऱ्यांपैकीं पहिली, ती प्रकाशली आहे पहा.'

वृत्तसुखार्थ पहिल्या, दुसऱ्या आणि चवथ्या चरणांत अनुक्रमें 'दैविआनि,' 'मनुषिआ' आणि 'वि अग्रौत्' असें वाचावें.

३. 'कान्तिरूप वस्त्र नेसलेली ही द्यूची कन्यका कालच्या वेळींच पहा पुन: पूर्व दिशेकडे दृष्टीस पडत आहे. ही आदित्याच्या मार्गानें समोर पहा कशी रस्ता चांगला जाणणाऱ्या स्त्रियेप्रमाणें जात आहे. ही भलत्याच दिशेला उगवून, भलत्याच दिशेला जर जाईल, तर पूर्व कशाला म्हणावें, पश्चिम कशाला म्हणावें, दक्षिण कशाला म्हणावें आणि उत्तर कोणती समजावी याविषयीं फार घोटाळा होईल; पण ही तसें होऊं देत नाहीं. पूर्वेसच उगवते आणि पश्चिमेकडेसच जाते, त्यामुळें दिशांचा परस्पर संबंध पूर्ववत् राहतो.'

'द्यूची कन्यका '=' दिवो दुहिता. ' सू. ४८ मं. १ आणि त्याजवरील टीप पहा.

उपो अदर्शि शुन्ध्युवो न वक्षो नोधा इवाविरकृत प्रियाणि ।
अद्मसन्न ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम् ॥ ४ ॥

उपो इति । अदर्शि । शुन्ध्युवः । न । वक्षः । नोधाःऽइव । आविः । अकृत । प्रियाणि ।
अद्मऽसत् । न । ससतः । बोधयन्ती । शश्वत्ऽतमा । आ । अगात् । पुनः । आऽईयुषीणाम् ॥ ४ ॥

स्यादित्यस्य पन्थां पन्थानं मेरोः प्रान्तप्रदेशमनुक्रमेण साधु सम्यगेति गच्छति । सूर्यो यत्र यत्र गच्छति तत्र तत्र पुरस्तादुषा अपि गच्छतीत्यर्थः । सैव विशेष्यते । प्रजानतीव ।....। यथा लोके प्रियतमेऽनुरागयुक्ता काचिद्भर्तारं सर्वास्ववस्थासु न विमुञ्चति तथेयमपीत्यर्थः । किंच दिशः प्रागादिका न मिनाति । न हिनस्ति । किंतूषा यत्र गच्छति सा प्राचीत्येवं प्रागादिव्यवहारं करोतीत्यर्थः । इति सायणः ॥

ऋतस्य पन्था इति पदद्वयं सायणेन (ऋ. ५. ८०. ४) एषा व्येनीत्यादौ अत्रवदेव विवृतमस्ति । प्रायस्तु स यज्ञस्य मार्ग इति ऋक्संहितायां व्याचष्टे । पूर्वोक्तमन्त्रे एषा दिवो दुहितेत्यादौ च आदित्यस्य मार्गमनुगच्छतीति व्याख्यानम् अपरिहरणीयम् । तत्र चेदमनुसंधेयम् । यद्यपि ऋतस्य पन्था इत्येतस्य यज्ञस्य मार्ग इत्यक्षरार्थो भवति तथापि ऋतार्थं यज्ञार्थम् आदित्यादयो येनान्तरिक्षमार्गेण पूर्वस्या दिशः सकाशात्पश्चिमदिक्पर्यन्तं विततेन आगच्छन्ति स ऋतस्य पन्था आदित्यस्य पन्था इति संभाव्यम् इति ॥

भाषायाम्.

४. शुन्ध्युवो न वक्षः (= आदित्यस्य वक्षःस्थलमिव) [एषोषा] उपो अदर्शि (= समीप एव दृश्यते पश्य पश्य) । नोधा इव (= नोधाः कविरिव ?) प्रिया (= प्रियाणि=स्वतेजांसि) आविरकृत (= प्रकटीकरोति पश्य पश्य) । पुनरेयुषीणां (= पुनः पुनः आगतवतीनाम् =आगच्छन्तीनां) शश्वत्तमा (= नियतमागच्छन्ती) [एषोषा] अद्मसत् न (= पाचिकेव) ससतो बोधयन्ती (= स्वपतो जनान् जागरयन्ती) [सती] आ अगात् (= आगतास्ति पश्य पश्य) ॥

अस्याः पूर्वार्धो दुर्बोधः सायणेनापि कथंकथमपि व्याख्यातः । एषोषाः । उपो इति निपातद्वयसमुदायात्मक एको निपातः । सर्वैः समीप एवादर्शि । दृश्यते । तत्र दृष्टान्तः । शुन्ध्युवो न वक्षः .... । शुन्ध्युरादित्यः । सर्वेषां शोधकत्वात् ।

४. [ही पहा उषा] आदित्याच्या वक्ष:स्थळाप्रमाणें जवळ दिसत आहे. हिणें नोध्याप्रमाणें [आपलीं] प्रिय [तेजें] प्रगट केलीं आहेत. निजलेल्यांस स्वयंपाकिणीप्रमाणें जागे करणारी, [आणि] पुन:पुन: येणाऱ्यांमध्यें अतिनियमितपणें येणारी [ही उषा] आली आहे [पहा].

4. She has exhibited herself near like the breast of the sun. She has manifested [her] beloved [splendors] like Nodhas. Waking those that are asleep even as a cook, [Ushas], the most unfailing of those that have come, has appeared.

'दिशांला बाध आणीत नाहीं '= 'न दिशो मिनाति.' उषा आणि सूर्य अथवा त्यांजसारिखे जे प्रकाशमान तारे इत्यादि, ते जर भलत्याच दिशेला उगवतील आणि भलत्याच दिशेनें जातील तर सर्व दिशांचा भंग होईल यांत संशय नाहीं.

'आदित्याच्या मार्गानें '=' ऋतस्य पन्थाम्. ' हा अर्थ सायणांस अनुसरून दिला आहे. अक्षरश: अर्थ ' सत्याच्या मार्गानें ' इतकाच होतो, आणि हे शब्द वेदांत पुष्कळ ठिकाणीं आले आहेत; त्यांचा सायणाचार्य प्राय: 'सत्यभूत जो यज्ञ त्याच्या मार्गानें' असा अर्थ करीत असतात. पण प्रस्तुत मंत्रांत आणि ऋ.५. ८०. ४ यांतहि हाच उत्तरार्ध आला आहे त्या ठिकाणीं ते 'ऋतस्य पन्थाम्' म्हणजे आदित्याच्या (सूर्याच्या) मार्गानें असें भाष्य करितात; आणि वाक्यसंदर्भाकडे पाहतां तसें करणें इष्ट आहे इतकेंच नाहीं, पण केल्याशिवाय योग्य निर्वाह दिसत नाहीं. आणि सविता, वरुण, अर्यमा, सूर्य हे ज्या मार्गानें यज्ञाप्रत (=ऋतं प्रति) येतात, तो 'ऋतस्य पन्था:' अशी व्युत्पत्ति चांगली संभवते. शिवाय सू. १२३ मं. ८ यांत ' दीर्घं सचन्ते वरुणस्य धाम ' असें म्हटलें आहे त्याचेंहि तात्पर्य ' ऋतस्य पन्थाम् अनु एति साधु ' याच्या सारिखेंच आहे.

वृत्तासाठीं ' ऋतस्य पन्थामनु एति साधु ' असा तिसरा चरण वाचला पाहिजे.

---

४. या मंत्राचा पूर्वार्ध दुर्बोध आहे. अक्षरार्थ तर उघड आहे; पण पहिल्या आणि दुसऱ्या चरणांत ज्या उपमा दिल्या आहेत, त्या उघड नाहींत. आदित्याच्या वक्ष:स्थलाप्रमाणें उषा प्रगट होत आहे हें नीट जुळत नाहीं; आणि नोधा कवि याजप्रमाणें आपली तेजें उषेनें प्रगट केलीं, हें तर अगदीच जुळत

पूर्वे अर्धे रजसो अप्त्यस्य गवां जनित्र्यकृत प्र केतुम् ।
व्यु प्रथते वितरं वरीय ओभा पृणन्ती पित्रोरुपस्था ॥ ५ ॥ ७ ॥

पूर्वे । अर्धे । रजसः । अप्त्यस्य । गवाम् । जनित्री । अकृत । प्र ।
केतुम् ।
वि । ऊम् इति । प्रथते । विऽतरम् । वरीयः । आ । उभा । पृणन्ती ।
पित्रोः । उपऽस्था ॥ ५ ॥ ७ ॥

तस्य वक्षो वक्षःस्थानीयो रश्मिसमूहः । स यथा प्रकाशमानो दृश्यते तथेत्यर्थः । यद्वा शुन्ध्युरिति जलचरः श्वेतवर्णः पक्षिविशेषः । स यथा स्वकीयं वक्षः प्रकाशयन्दृश्यते तद्वदित्यर्थः । किं च । नोधा इव प्रियाण्याविरकृत । नवनं स्तोत्रं धारयतीति नोधाः । एतन्नामा महर्षिर्देवतास्तुतिव्याजेन नानाविधैर्मन्त्रैः प्रियाणि स्वमनीषितान्याविष्कृतवान् । तथैषापि स्वकीयानि सर्वलोकप्रियाणि तेजांस्याविरकरोत् । इति ॥

भाषायाम्.

५. गवां जनित्री (=किरणानां माता) [एषोषा] अप्त्यस्य रजसः (=उदकसंबन्धिनो लोकस्य=अन्तरिक्षस्य) पूर्वे (=प्रथमे) अर्धे (=भागे) केतुं (=प्रकाशं) प्र अकृत (=प्रकटीकृतवती पश्य पश्य) । पित्रोः (=द्यावापृथिव्योः स्वभूतयोर्मातापित्रोर्) उपस्था (=उपस्थे=उदरे=अन्तरालप्रदेशे) उभा (=उभौ तौ मातापितरौ) आ पृणन्ती (=सर्वतः स्वतेजसा पूरयन्ती) [एषा] वि उ (=विविधमेव =विशेषेणैव)·वितरं वरीयः (=विशिष्टतरम् उरुतरं विस्तीर्णं यथा भवति तथा) प्रथते (=विस्तृता भवति·पश्य पश्य) ॥

नाहीं. सायणांनींहि कसा तरी निर्वाह केला आहे· (भाषा पहा). नोधा हें एका प्रसिद्ध ऋषीचें नांव आहे. तो सूक्तें ५८–६४ यांचा कर्ता होय. शिवाय ८. ८८; ९. ९३ यांचाहि तोच कर्ता होय.

५. उदकमय प्रदेशाच्या पूर्वार्धांत [ही] कोमळ किरणांची जननी प्रकाश प्रगट करीत आहे. [ही] फारच दूरवर सर्व बाजूंनीं पसरत आहे, आणि आपल्या आईबापांच्या पोकळींत [राहून] [त्या] दोघांलाहि भरून टाकीत आहे.

5. The mother of the early rays has put forth light in the eastern half of the watery region. She is spreading far and wide in all directions, filling both her parents with her light in their womb.

५. 'प्रभातकाळीं जे बालकिरण थोडथोडे फांकूं लागतात, त्यांची आईच अशी ही उषा पहा अंतरिक्षाच्या पूर्वभागीं अंधार होता तेथें प्रकाश पाडीत आहे. तिचे आईबाप जे भूलोक आणि द्युलोक, यांच्या मोठ्या पोकळींत उजेड फेकून त्या दोघांलाहि पहा ही कशी भरून टाकीत आहे, आणि सर्व बाजूंनीं पहा कशी ही दूरवर आपला प्रकाश पसरीत आहे!'

'उदकमय प्रदेशाच्या पूर्वार्धांत'= 'पूर्वे अर्धे रजसो अप्यस्य.' 'रजः अप्यम्' म्हणजे ज्यामध्यें मेघोदकें बाष्परूपानें राहतात असा प्रदेश, म्हणजे अंतरिक्ष. त्याच्या पूर्वेकडील भागांत; म्हणजे पूर्व दिशेकडेस.

'आईबापांच्या पोकळींत'=' पित्रोः उपस्था.' अक्षरार्थ आईबापांच्या उदरांत. भू आणि द्यू हे उषेचे आईबाप असें पूर्वी सांगितलेंच आहे. सू. ४८ मं. ८ इत्यादि पहा. 'उपस्था' ही आम्ही 'उपस्थे' याऐवजीं सप्तमी सायणांस अनुसरून घेत आहों. कितीएक पाश्चात्य विद्वान् 'उभा उपस्था'=' दोनहि उदरें' असा अन्वय करितात; पण तो चिन्त्य दिसतो. 'पोकळी' म्हणजे पृथिवीपासून अगदी द्यूच्या माथ्यापर्यंत जो अवकाश, तो विवक्षित आहे.

वृत्तासाठीं पहिल्या चरणांत 'अप्तिअस्य,' दुसऱ्यांत 'जनित्री अकृत,' तिसऱ्यांत 'वि उ' आणि चवथ्यांत 'पितरो०' असें वाचावें लागतें.

एवेदेषा पुरुतमा दृशे कं नाजामिं न परि वृणक्ति जामिम् ।
अरेपसा तन्वा३ शाशदाना नार्भादीषते न महो विभाती ॥ ६ ॥

एव । इत् । एषा । पुरुऽतमा । दृशे । कम् । न । अजामिम् । न ।
परि । वृणक्ति । जामिम् ।
अरेपसा । तन्वा । शाशदाना । न । अर्भात् । ईषते । न । महः ।
विऽभाती ॥ ६ ॥

भाषायाम्.

६. एवेत् (=एवमेव=इदानीं भासमानप्रकारेणैव) पुरुतमा (=बहुलतमा=अत्यन्तं सर्वेषां गमनीया) एषा [उषा] दृशे कं (=द्रष्टुं=सर्वे यथा पश्यन्ति तथा) [विभाति] । अजामिं (=विजातीयं कंचिदपि) न [परि वृणक्ति] जामिं (=सजातीयमपि) न परि वृणक्ति (=न वर्जयति) । अरेपसा (=निर्मलया) तन्वा (=शरीरेण) शाशदाना (=" शाशद्यमाना=स्पष्टतां गच्छन्ती "=सुन्दरैः शरीरावयवैः शोभमाना) विभाती (=तेजस्विनी) [उषा] न अर्भात् ईषते (=नाल्पात्पदार्थात् परमाण्वादेरपि गच्छति=परमाणुमपि न वर्जयति) न महः [ईषते] (=महतोपि पदार्थात्=पर्वतादेरपि न गच्छति=महतोपि पदार्थान् न वर्जयति) ॥

पूर्वं लोकद्वयं प्रकाशत इत्युक्तम् । इदानीमस्मिंल्लोके परमाण्वादि पर्वतपर्यन्तं कृत्स्नं प्रकाशयतीत्यर्थः । इति सायणः ॥

६. या प्रकारेंकरूनच ही सर्वत्र जाणारी उषा सर्वांस दिसावें म्हणून प्रकाशते, अनाप्तांला वगळीत नाहीं आणि आप्तांलाहि वगळीत नाहीं. निर्मळ शरीरानें प्रगट होणारी तेजस्वी उषा लहानालाहि सोडीत नाहीं, आणि मोठ्यालाहि सोडीत नाहीं.

6. In this very manner most bounteous Ushas shines [for all] to see: she [omits] not the stranger, omits not [her] kindred. Proudly manifested in [her] stainless person, bright [Ushas] passes by neither the small nor the great.

६. 'उषा दूरवर आपलें तेज पसरिते इतकेंच नव्हे, तर ती सर्वांवर सारिखी प्रकाशते. आपल्या आप्तांवर जशी तशीच परक्यांवर प्रकाशते, आणि मोठ्यावर तशीच लहानावरहि प्रकाशते. कोणाचाच पक्षपात करीत नाहीं.'

'सर्वत्र जाणारी'='पुरुतमा.' अक्षरशः 'अतिशयेंकरून विपुल' असा अर्थ आहे. म्हणजे, एकाला पुरून दुसऱ्याला न उरणारी अशी नव्हे, सर्वांस पुरून उरणारी, सर्वाला लाभणारी.

वृत्तासाठीं तिसऱ्या पादांत 'तन्वा'-च्या ठिकाणीं 'तनुआ' असा पाठ म्हणावा लागतो.

अभ्रातेव॑ पुंस ए॑ति प्रती॒ची ग॑र्ता॒रुगि॑व स॒नये॒ धना॑नाम् ।
जा॒येव॒ पत्य॑ उश॒ती सु॒वासा॑ उ॒षा ह॒स्रेव॒ नि रि॑णीते॒ अप्स॑: ॥ ७॥

अ॒भ्रा॒ताऽइ॑व । पुं॒सः । ए॒ति । प्र॒ती॒ची । ग॒र्त॒ऽआ॒रुगि॑व । स॒नये॑ । धना॑नाम् ।
जा॒याऽइ॑व । पत्ये॑ । उ॒श॒ती । सु॒ऽवासा॑: । उ॒षाः । ह॒स्राऽइ॑व । नि । रि॒णी॒ते॒ । अप्स॑: ॥ ७ ॥

भाषायाम्.

७. अभ्रातेव गर्तारुगिव (=अभ्राता=भ्रातृहीना न्यायाधिष्ठितस्थानमारूढा राज्ञी-च) धनानां सनये (=द्रव्याणां दानाय=द्रव्यं दातुं) प्रतीची पुंसः एति (=स्वस्थानान्निवृत्ता परपुरुषाभिमुखा सत्यायाति) । सुवासाः (=शोभनवसना) उशती (=कामयमाना) जाया पत्ये इव (=भार्या यथा पत्युः समक्षं तथा) हस्रा इव (=हसन्ती सती) अप्सः नि रिणीते (=रूपं नितरां गमयति=स्वावयवान् प्रकाशयति) ॥

सायणस्तु पूर्वार्धमस्या अन्यथा व्याख्यातवान् । तदेवम् । अभ्रातेव भ्रातृरहितेव पुंसः पित्रादीन्प्रतीची स्वकीयस्थानात्प्रतिनिवृत्तमुखी सत्येति । गच्छति । यथा लोके भ्रातृरहिता योषित्स्वोचितवासोऽलंकारादिलाभाय पितृनेति । सति भ्रातरि स एवोचितप्रदानादिना सम्यक् तोषयति । तदभावात्पितरमेव प्राप्नोति । यद्वा । सति स्वभ्रातरि स एव पितुः पिण्डदानादिकं संतानकृत्यं करोति । तस्याभावात्स्वयमेव तत्कर्तुं पित्रादीन्गच्छति । तद्वदियमुषा अपि स्वोचितप्रकाशादिलाभाय स्वप्रकाशदानाय वा पितृभूतं सूर्यमाभिमुख्येन गच्छति । अयमेको दृष्टान्तः । तथा धनानां सनये गर्तारुगिवेत्यपरो दृष्टान्तः । गर्त इति गृहनाम । कृदरो गर्त इति तन्नामसु पाठात् । अत्रौचित्येन राजपुरुषैर्न्यायनिर्णेतृभिश्चाधिष्ठितं स्थानमुच्यते । तदारोहतीति गर्तारुक् । यथा लोके काचिद्गतभर्तृका योषिद्धनानां स्वकीयरिक्थानां सनये लाभाय गर्तमागच्छति । तां तु सभ्या विचार्य यदीयं रिक्थं लभते चेदक्षैः संताड्य तदीयं धनं वितरन्ति । तथेयमपि धनानां प्रीणनसाधनानां प्रकाशानां सनये लाभाय गर्तमाकाशं सूर्यनिवासस्थानमारोहति । देशविशेषाचारमपेक्ष्यैवं दृष्टान्तितम् ।......अयं मन्त्रो निरुक्ते स्पष्टं व्याख्यातः । अभ्रातृकेव पुंसः पितृनेत्यभिमुखी संतानकर्मणे पिण्डदानाय न पतिं गर्तारोहिणीव धनलाभाय दाक्षिणाजी । गर्तः सभस्थाणुर्गृणातेः सत्यसंगरो भवति तं तत्र याऽपुत्रा यापतिका सारोहति तां तत्राक्षैराघ्नन्ति सा रिक्थं लभत इति । जायेव पत्ये कामयमाना सुवासा ऋतुकालेषूषा हसनेव दन्तान्विवृणुते । नि० ३. ५ । इति च ॥

७. [एकाद्या] भ्रातृहीन [राणी]प्रमाणें [ही उषा] द्रव्यें देण्यासाठीं सिंहासनारूढ [होऊन] [पर] पुरुषांसमोर येत आहे. सुंदर वस्त्रें नेसलेली कामातुर जाया [आपल्या] नवऱ्यापुढें [आपले अवयव उघडे करिते, तशी] [ही] उषा हांसत हांसत [आपलें] रूप उघडें करीत आहे पहा.

7. Like a brotherless [queen] [Ushas] is coming into the presence of strangers mounted on the throne,to distribute wealth. Ushas is smilingly exhibiting [her] beauty as a welldressed loving wife before [her] husband.

---

७. 'जशी एकादी भाऊबंद नसलेली राणी सिंहासनावर बसून लोकांचे न्याय तोडून, ज्याला माल देणें योग्य असेल त्याला देण्याकरितां सभेंत येते, त्याप्रमाणें जनांला धन देण्याकरितां ही उषा येत आहे. अथवा जशी एकादी उत्तम वस्त्रालंकार घातलेली स्त्री आपले अवयव आपल्या पतीच्या पुढें थोडथोडे उघडे करीत येते, तशी ही उषा हांसत हांसत आपलें रूप उघडें करून येत आहे पहा.'

या ऋचेचा पूर्वार्ध जरा दुर्बोध आहे. फार जुन्या काळांच्या रीतिभातींला अनुलक्षून उपमा दिली आहे, आणि त्या रीतिभाती आतां बदलल्या आहेत त्यामुळें दुर्बोधत्व आलें आहे. सायणांनीं यास्कास अनुसरून निराळाच अर्थ केला आहे, तो भाषेखालीं पहा.

'सिंहासनारूढ'=' गर्तारुक्.' 'गर्त' शब्दाचा अर्थ सायणांनीं बहुतकरून सर्वत्र 'रथ' असा केला आहे. तेव्हां रथारूढ होऊन धन मिळविण्याकरितां परपुरुषांसमोर लढाईत जाणाऱ्या स्त्रीप्रमाणें ही येत आहे, असा कदाचित् एक अर्थ संभवतो.

स्वसा स्वस्रे ज्यायस्यै योनिमारैगपैत्यस्याः प्रतिचक्ष्येव ।
व्युच्छन्ती रश्मिभिः सूर्यस्याञ्ज्यङ्क्ते समनगा इव व्राः ॥ ८ ॥

स्वसा । स्वस्रे । ज्यायस्यै । योनिम् । अरैक् । अप । एति । अस्याः । प्रतिचक्ष्यऽइव ।

विऽउच्छन्ती । रश्मिऽभिः । सूर्यस्य । अञ्जि । अङ्क्ते । समनगाःऽइव । व्राः ॥ ८ ॥

आसां पूर्वासामहसु स्वसॄणामपरा पूर्वामभ्येति पश्चात् ।
ताः प्रत्नवन्नव्यसीर्नूनमस्मे रेवदुच्छन्तु सुदिना उषासः ॥ ९ ॥

आसाम् । पूर्वासाम् । अहऽसु । स्वसॄणाम् । अपरा । पूर्वाम् । अभि । एति । पश्चात् ।

ताः । प्रत्नऽवत् । नव्यसीः । नूनम् । अस्मे इति । रेवत् । उच्छन्तु । सुऽदिनाः । उषसः ॥ ९ ॥

भाषायाम्.

८. [कनीयसी] स्वसा (=रात्रिरूपा) ज्यायस्यै (=ज्येष्ठायै) स्वस्रे (=भगिन्यै=उषसे) योनिम् अरैक् (=स्थानं प्रेरेचितवती) [अपि च] अस्याः प्रतिचक्ष्येव (=इमाम् उषसं दृष्ट्वेव) अप एति (=अप गच्छति) । सूर्यस्य रश्मिभिः (=सूर्यस्य किरणैः सह) व्युच्छन्ती (=तमो निवारयन्ती=प्रकाशमाना) व्राः (=उषाः) समनगाः इव (=समनमवधारितं स्थानं तत्प्रति गन्त्रीव=अभिसारिकेव) अञ्जि अङ्क्ते (=तेजः प्रकाशयति) ॥

एकस्मादेवान्तरिक्षादुत्पन्नत्वात्परस्परं स्वसृभावः । तथाप्यह्नः प्राथम्यात्तेजस्वित्वाच्च ज्यायस्त्वम् । ...... । स्थानम्......प्रादात् । ......दत्त्वा चास्या उत्पन्नाया उषसः प्रतिचक्ष्येव ज्ञापयित्वेव स्वयमपसृत्यैव गच्छति । ज्यायस्यामागतायां तस्यै स्वस्थानं दत्त्वा स्वयं तत्संनिधौ स्थातुमनुचितमिति विज्ञायैवापगच्छतीति भावः । इति सायणः ॥

९. आसां पूर्वासाम् (=अतीतानां) स्वसॄणां (=स्वसृभूतानाम् उषसां मध्ये) अपरा (=उत्तरा=अद्यतनी उषा) अहसु (=अहःसु=प्रतिदिनं) पूर्वाम् (=अतीतदिवससंबन्धिनीमुषसं) पश्चात् अभि एति (=तस्याः पश्चादागच्छति) । नूनम्

पोंच ता. १ पासून ता. ३१ अक्टोबर.

	रु. आ. पै.
रा. सा. प्रागजी वल्लभदास डे० येज्युके. इन्स्पे.	६— ६—०
रा. रा. कृष्णराव हरी क्लार्क आफ् धी कोर्ट.	०—१२—०
,, ,, सी कन्हीकानन....	७— ०—६
,, ,, श्रीपाद बाबाजी ठाकूर....	१२—१२—०
रेव्हरेंड जे. हॉल अमेरिकन मिशन	१— ६—०
कलेक्टर मुंबई....	३८—१२—०
मि. वसंतराम पांड्या अकौन्टन्ट	१९— २—०

Registered No. 110 of 1878.

NOTICE.

The third Volume of the *Vedârthayatna* will end with the last hymn of the 1st Maṇḍala, i. e. with hymn 191.

Subscription is annual and commences with the beginning of any Volume.

विशेष सूचना.

पहिल्या मंडलाचें शेवटचें सूक्त, म्हणजे ऋग्वेद संहितेचें सूक्त १९१, हें संपलें म्हणजे वेदार्थयत्नाचा तिसरा भाग संपेल.

सूचना.

	रु.	आ.
वर्षाची वर्गणी, आगाऊ	६	०
मुंबईबाहेर राहणारांस टपाल हंशिलाबद्दल दरवर्षाचे	०	६
फुटकळ दर प्रतीस	०	१०

वर्गणीदार होण्यास इच्छिणाऱ्यांनीं कोणत्याहि भागाच्या आरंभापासून वर्गणीदार व्हावें.

All communications to be addressed to the Manager Mr. Mahâdev Nârâyan Paṇdit, No. 29 *Moroba Popatji's Oart, Kalka Devi Road, Bombay.*

सर्व प्रकारचा पत्रव्यवहार मुंबई मोरोबा पोपटजीची वाडी घर नंबर २९, या पत्त्यावर रा. रा. महादेव नारायण पंडित "म्यानेजर वेदार्थयत्न" यांच्याशीं ठेवावा.

THE

VEDÂRTHAYATNA

OR

AN ATTEMPT TO INTERPRET THE VEDAS.

The Rigveda Saṁhitâ with Marâṭhî and English translations, a paraphrase in classical Sanskṛit and copious notes in Marâṭhî.

वेदार्थयत्न.

ऋग्वेदसंहिता

पदांसहित व

तिचें मराठी आणि इंग्रजी भाषांतर,

संस्कृत व्याख्या आणि मराठी टीका.

VOL. III. NO. 2 NOVEMBER 1878. MONTHLY PART 32.

पुस्तक ३. अंक २. नवंबर सन १८७८. मासिक भाग ३२.

मुंबईंत

"निर्णयसागर" छापखान्यांत छापिलें.

माझे

सर्व आर्य बंधु व भगिनी

यांस

हें भाषांतर

सादर समर्पण केलें आहे.

भाषांतरकर्ता.

८. [धाकटी] वहीण थोरल्या [वहिणी]करितां जागा मोकळी करीत आहे, आणि तिला पाहिल्याबरोबर जणुं आपण निघून जात आहे. सूर्याच्या किरणांबरोबर प्रकाशणारी उषा, संकेतस्थळीं जाणाऱ्या स्त्रीप्रमाणें, आपलें तेज प्रगट करीत आहे.

8. The [younger] sister has vacated the abode for her elder sister, and, as if seeing her, departs. Dawning with the rays of the sun, Ushas, like one going to a rendezvous, is decorating herself.

९. या येऊन गेलेल्या भगिनींतून प्रतिदिनीं पुढची [वहीण] पूर्वील [वहिणी]च्या मागून येत असते. आतां ज्या नव्या उषा, त्या निरभ्रमुख [होऊन] पुराण [उषां]-प्रमाणें आम्हांकरितां संपत्ति आणून प्रकाशोत.

9. Of those past sisters each succeeding one has daily come after an elder one. Now may these future Ushases shine brightly for us with wealth like the old ones.

---

८. ' रात्र आणि उषा या दोघी बहिणी; त्यांतून रात्र धाकटी, उषा मोठी. मोठ्या वहिणीकरितां धाकटी जणुं अंतरिक्षस्थान सोडून जात आहे, आणि मोठी वहीण येतांच आपण तिला पाहिल्याबरोबर जणुं निघून जात आहे. आणि ही उषा सूर्याच्या किरणांबरोबर प्रकाशणारी, एकाद्या अभिसारिकेप्रमाणें, आपलें शरीर सुशोभित करून प्रगट करीत आहे. '

' जागा मोकळी करीत आहे '= ' योनिम् अरैक्. ' सू. ११३ मं. १ आणि टीप पहा.

' संकेतस्थळीं जाणाऱ्या स्त्रीप्रमाणें'= ' समनगा इव. ' या शब्दांचा अर्थ संदिग्ध आहे, आणि सायणांनीं तरी निश्चयानें केलेला नाहीं.

वृत्तासाठीं दुसऱ्या चरणांत ' अपैति अस्याः प्रतिचक्ष्यइव ' असें, आणि तिसऱ्यांत ' वि उच्छन्ती रश्मिभिः सूरिअस्य ' आणि चवथ्यांत ' अग्नि अक्ले ' असें वाचावें लागतें.

९. ' आजपर्यंत ज्या उषा होऊन गेल्या, त्यांतून प्रत्येक नवी उषा एका जुन्या उषेच्या मागून येऊन प्रतिदिनीं गेली. आतां यापुढें ज्या येणार आहेत, त्या सर्व उषा निर्मळ अंतरिक्षांत आम्हांकरितां जुन्या उषांप्रमाणेंच प्रकाशून आ-

प्र बो॑धयोषः पृण॒तो म॑घो॒न्यबु॑ध्यमानाः प॒णयः॑ ससन्तु ।
रे॒वदु॑च्छ म॒घव॑द्भ्यो मघोनि रे॒वत्स्तो॒त्रे सू॑नृते ज॒रय॑न्ती ॥१०॥८॥

प्र । बो॒ध॒य॒ । उ॒षः॒ । पृ॒ण॒तः । म॒घो॒नि॒ । अबु॑ध्यमानाः । प॒णयः॑ ।
स॒स॒न्तु॒ ।
रे॒वत् । उ॒च्छ॒ । म॒घव॑त्ऽभ्यः । म॒घो॒नि॒ । रे॒वत् । स्तो॒त्रे । सू॒नृ॒ते॒ । ज॒-
रय॑न्ती ॥ १० ॥ ८ ॥

(=अधुना) ता नव्यसीः उषसः (=ता नवीयस्य उषसः=या आगामिन्य उषसस्ताः) सुदिनाः (=शोभनदिनमुखाः सत्यः) प्रत्नवत् (=पुराणोषोवत्) अस्मे (=अस्मभ्यम्=अस्मदर्थं) रेवत् (=धनवद्यथा भवति तथा=धनैः सहितम्) उच्छन्तु (=उच्छन्तु)॥

अपरा पूर्वाम् अभि एति पश्चात् इत्यत्र अव्यवधानेन गच्छतीत्यर्थः। इति सायणः॥

भाषायाम्.

१०. हे मघोनि उषः (=धनवति उषः), पृणतः प्रबोधय (=हविर्भिस्त्वां पूरयतः=हविर्दत्तवतो जनान् प्रतिबुद्धान् कुरु=प्रतिजागरय)। पणयः (=अदानशीलाः=लुब्धकाः=अनुपासका जना) अबुध्यमानाः ससन्तु (=त्वया अप्रतिबुध्यमाना एव स्वपन्तु="दीर्घनिद्रा भवन्तु")। हे मघोनि (=धनवति), मघवद्भ्यः (=हविर्दत्तवद्भ्यो=यजमानेभ्यो) रेवत् (=धनैः सहितं यथा तथा) उच्छ (=प्रकाशस्व) [तथैव] हे सूनृते (=मधुरवाचां प्रेरयित्रि), जरयन्ती (=सर्वेषां प्राणिनाम् आयुः क्षपयन्ती) [त्वं] स्तोत्रे (=मत्सदृशाय कवयेपि) रेवत् (=धनैः सहितं यथा भवति तथा) [व्युच्छ=विभाहि]॥

पणयो व्ययासहिष्णवो वणिजः। पणिर्वणिग्भवतीति यास्कः। पणय इति लुब्धका अबुध्यमाना यागादीन् अकुर्वाणा अदानशीला अस्मच्छत्रवः ससन्तु। स्वपन्तु। दीर्घनिद्रा भवन्तु। म्रियन्तामित्यर्थः। तथा च मन्त्रान्तरं 'ससन्तु त्या अरातयो बोधन्तु शूर रातयः'। ऋ० १. २९. ४। इति। इति सायणाचार्याः॥

म्हांला धनसंपन्न घेऊन येओत.'

'भगिनींतून'='स्वसॄणाम्.' दररोज येणाऱ्या उषा एकसारिख्याच असतात, आणि त्या एकमेकींशीं प्रीतीनें जणुं वागल्याप्रमाणें निमूटपणें येऊन जातात म्हणून त्यांला 'भगिनी' म्हणणें यांत पुष्कळ स्वारस्य आहे.

'नव्या'='नव्यसीः.' म्हणजे ज्या

१०. हे उदार उषे, तूं दात्यांला जागे कर. कृपण जन जागे न होतां तसेच निजोत. हे उदार [उषे], हविर्दात्या जनांसाठीं तूं धनसंपत्ति घेऊन ये आणि प्रकाश. हे मधुरवचने उषे, म्हातारपण आणणारी तूं स्तोत्यासाठींहि धनसंपत्तीनिशीं प्रकाश.

10. Awaken the liberal sacrificers, O bounteous Ushas. Let the unsacrificing misers sleep unawakened. Shine thou, O bounteous one, with riches for the liberal givers of oblations, shine thou the cause of old age, with riches for the poet, O thou inspirer of sweet voices!

पुढें येणाऱ्या उषा त्या.

'संपत्ति आणून प्रकाशोत'=' रेवत् उच्छन्तु.' म्हणजे प्रकाशोत आणि आम्हांला संपत्ति आणोत. जेणेंकरून आमचें कल्याण होईल असें त्यांचें दर्शन आम्हांला होओ असें तात्पर्य.

वृत्तासाठीं दुसऱ्या चरणांत 'अभि एति' असें वाचावें लागतें.

१०. 'हे धनवती उषे, तुला जे उदारपणें हवि देऊन तृप्त करितात, त्यांस तूं जागे कर; जे हवि देत नाहींत आणि कृपण राहतात, ते तसेच निजूं दे, त्यांस तूं उठवूं नको. तूं यजमानांला आणि मजसारिख्या स्तोत्यांला धन घेऊन ये आणि प्रकाश' असा भावार्थ.

'निजोत'=' ससन्तु.' म्हणजे 'निजलेले तसेच मरोत' असा भावार्थ आहे असें सायण म्हणतात तें संभवतें.

'म्हातारपण आणणारी'=' जरयन्ती.' हें येथें केवळ सहजोक्तिदर्शक विशेषण आहे; हेतुदर्शक नाहीं.

'स्तोत्यासाठींहि'=' स्तोत्रे.' येथें हवि देणारे यजमान, आणि स्तोत्रें रचून यजमानासाठीं म्हणणारे कवि अथवा ऋषि, हे वेगळे जाणविले आहेत. हे जे ऋषि, त्यांचीच संतति मागाहून ब्राह्मणाची जात होऊन बसली.

वृत्तासाठीं 'मघोनि । अबुध्यमानाः' असें व्यस्त म्हणावें लागतें.

अवेयमश्वैद्युवतिः पुरस्ताद्युङ्क्ते गवामरुणानामनीकम् ।
वि नूनमुच्छादसति प्र केतुर्गृहंगृहमुप तिष्ठाते अग्निः ॥ ११ ॥

अवं । इयम् । अश्वैत् । युवतिः । पुरस्तात् । युङ्क्ते । गवाम् । अरुणानाम् । अनीकम् ।
वि । नूनम् । उच्छात् । असति । प्र । केतुः । गृहम्ऽगृहम् । उप । तिष्ठाते । अग्निः ॥ ११ ॥

उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥ १२ ॥

उत् । ते । वयः । चित् । वसतेः । अपप्तन् । नरः । च । ये । पितुऽभाजः । विऽउष्टौ ।
अमा । सते । वहसि । भूरि । वामम् । उषः । देवि । दाशुषे । मर्त्याय ॥ १२ ॥

भाषायाम्.

११. इयं युवतिः (=तरुणी=नित्ययौवनोषाः) पुरस्तात् (=पूर्वस्यां दिशि) अवाश्वैत् (=अत्यर्थमागच्छति) । [सा] अरुणानाम् (=आरक्तवर्णानां) गवाम् अनीकं (=समूहं) युङ्क्ते (=स्वरथे योजयति) । नूनम् (=अधुना) [सा] वि (=विशिष्टं=सर्वत्र) उच्छात् (=प्रकाशताम्) । केतुः (=तस्यास्तेजः) प्र असति (=प्रास्तु=प्रकर्षेण भवतु) । अग्निर्गृहंगृहं (=प्रतिगृहं=सर्वेषु गृहेषु) उप तिष्ठाते (=उपतिष्ठताम्=आगच्छतु) ॥

१२. हे देवि उषः (=द्योतमाने उषः), ते व्युष्टौ (=तव व्युच्छने सति=त्वयि प्रकाशेन सह उदितायां सत्यां) वयश्चित् (=पक्षिणश्च) पितुभाजः (=अन्नार्थिनो) ये नरः (=मनुष्यास्) [ते] च वसतेः (=स्वस्वनिवासस्थानात्) उद् अपप्तन् (=उत्पतन्ति उत्थाय स्वस्वव्यापारं गच्छन्ति च) । अमा सते (=गृहे वर्तमानाय=गृह एव तिष्ठते) मर्त्याय दाशुषे (=मर्त्याय यजमानाय) [तु] [त्वं] भूरि वामं (=विपुलं धनं) वहसि (=आनयसि) ॥

पितुभाज इत्यत्र पितुभाजोऽन्नवन्तोऽन्नार्थिनः कृषिवाणिज्यादिकर्तारः स्वस्वव्यापारार्थम् उत् उन्मुखा अपप्तन् गच्छन्तीति सायणः ॥

११. ही तरुणी पूर्वदिशेकडे प्रकाशत आहे. ती आरक्त गाईंचा समुदाय आपल्या रथाला जोडीत आहे. ती आतां सर्वत्र प्रकाशो. हिचें तेज सर्वत्र पसरो. प्रत्येक घरीं अग्नि प्रवेश करो.

11. This young damsel has beamed forth in the east; she is yoking [to her chariot] her team of ruddy cows. Let her now shine far and wide. Let her effulgence come forth. Let the fire be kindled in every house.

१२. तूं प्रकाशूं लागतांच पक्षीहि [आपल्या] घरट्यांतून उडून जातात, आणि अन्नार्थी जे जन, [ते]हि [उठून जातात]; आणि हे देवी उषे, घरीं राहणाऱ्या मर्त्य उपासकाला [तर] तूं विपुळ धन घेऊन येतेस.

12. Away fly both birds and men who are food-questant from their abodes at thy dawn. To the sacrificing mortal who stays at home thou, O bright Ushas, bringest plentiful wealth.

---

११. 'आरक्त गाईंचा समूह '='अरुणानां गवाम् अनीकम्.' म्हणजे आपल्या 'अनेक आरक्त वर्णाच्या गाई.' उषा आपल्या रथाला आरक्त वर्णाच्या गाई अथवा घोडे जोडिते असें वेदांत सांगितलें आहे. सू. ४९ मं. १, सू. ९२ मं. १५, सू. ९२ मं. २ आणि त्यांजवरील टिपा पहा. ऋ. ५. ८०. ४ यांत 'तांबडे बैल (अथवा गाई) रथाला जोडणारी उषा '= 'एषा गोभिररुणेभिर्युजाना ' असें म्हटलें आहे.

'हिचें तेज सर्वत्र प्रकाशो '=' असति प्र केतुः.' अक्षरशः अर्थ 'प्रभा पुढें [उभी] राहो ' असा आहे. 'असति ' हें 'अस्ति ' याचें आज्ञार्थी (लेट्चें) रूप आहे. प्रत्ययापूर्वी 'अ ' जोडिला म्हणजे 'लेट् ' काळ सिद्ध होण्याचा एक प्रकार आहे.

'प्रवेश करो '=' उप तिष्ठाते.' म्हणजे 'प्रज्वलित केला जाओ.' उषा आली म्हणजे अग्नि पेटवून देवांला हवि देण्याची चाल असे, म्हणून आतां उषा उगवली, अग्नि प्रत्येक घरीं प्रदीप्त होओ, असें ऋषि म्हणतो.

१२. 'हे देवी उषे, तूं आपली प्रभा घेऊन उगवतांच सर्व पक्षी आपली घरटीं सोडून जातात, आणि मनुष्यें आपलीं घरें सोडून आपआपल्या कामाच्या पाठीमागें जातात. आणि तुला आणि इतर देवांला हवि देऊन तुमची

अस्तोढ्वं स्तोम्या ब्रह्मणा मेऽवीवृधध्वमुशतीरुषासः ।
युष्माकं देवीरवसा सनेम सहस्रिणं च शतिनं च वाजम् १३॥९

अस्तोढ्वम् । स्तोम्याः । ब्रह्मणा । मे । अवीवृधध्वम् । उशतीः । उषसः । युष्माकम् । देवीः । अवसा । सनेम । सहस्रिणम् । च । शतिनम् । च । वाजम् ॥ १३ ॥ ९ ॥

भाषायाम्.

१३. हे स्तोम्याः (=स्तोत्रार्हा) उषसः, [एवं प्रकारेण] मे ब्रह्मणा (=मम स्तोत्रेण) [यूयम्] अस्तोढ्वम् (=अस्तूयध्वम्=स्तुता अभवत) [अपि च] उशतीः (=उशत्यः=कामयमाना यूयम्) अवीवृधध्वम् (=अवर्धध्वं=वर्धिता अभवत=सप्रीति यथा तथा तुष्टा अभवत)। [एवं सति] हे देवीः (=देव्यः), युष्माकम् अवसा (=रक्षणेन=प्रसादेन) [वयं] सहस्रिणं च शतिनं च वाजं (=शतसंख्याकं सहस्रसंख्याकं च धनं) सनेम (=लभेमहि) ॥

सेवा करण्यासाठीं जो मर्त्य उपासक घरींच राहतो, त्याला तर तूंच पुष्कळ धन घेऊन येतेस–म्हणजे तसल्या प्रकारच्या मनुष्यांचा निर्वाह तूं उत्तम रीतीनें चालवितेस.'

'पक्षीहि' इ०. सू. ४८ मं. ५ आणि त्याजवरील टिपा पहा.

या ऋचेंत देवोपासक मर्त्यांचा निर्वाह कसा चालतो याविषयीं जी विश्वासाची उक्ति उत्तरार्धांत आहे, तिजवरून प्राचीन आर्यांची श्रद्धा दिसून येते. आणि असेंहि वाटतें कीं, यजनपूजन करण्यांत गुंतलेले जे लोक असत, ते कितीएक तरी व्यवहारांत न जाणारे असे असावेत; तसे असल्यामुळें कृषिकर्मादि उद्यम करणारे लोक त्यांचा निर्वाह चालवीत असतील.

वृत्तासाठीं दुसऱ्या चरणांत 'विउष्टौ' आणि चवथ्यांत 'मर्तिआय' असें म्हणावें लागतें.

१३. [या प्रकारेंकरून], हे स्तवनीय उषांनो, माझ्या स्तोत्रानें तुम्ही स्तविल्या आहां [आणि] सप्रीति संतुष्ट झालां आहां. [तर] हे देवी हो, तुमच्या प्रसादेंकरून आम्हांला हजारो आणि शेकडो धन प्राप्त होओ.

13. [Thus], O praiseworthy Ushases, you have been praised by my hymn [and] refreshed with pleasure. May we, [then], through your favour obtain, O goddesses, a thousandfold and a hundredfold wealth.

---

१३. हें सूक्त येथें संपलें; आणि आतां ऋषीच्या मनांत मागावयाचा वर त्याणें या ऋचेंत मागितला आहे. ' हे उषांनो, या प्रकारेंकरून तुमचें मी स्तोत्र केलें आहे, आणि हवीनें तुम्हांला तृप्त केलें आहे, आणि तें हविहि तुम्ही प्रीतीनें (उशतीः) भक्षिलें आहे. तर आतां तुमच्या प्रसादेंकरून आम्हांला शतपट आणि सहस्रपट धन मिळो.'

'सप्रीति'='उशतीः.' अक्षरशः 'प्रीति करणाऱ्या ज्या तुम्ही त्या.' म्हणजे तुम्ही मोठ्या प्रीतीनें हवि सेवन करून संतुष्ट झाल्या आहां.

वृत्तसुखासाठीं पहिल्या चरणांत ' अस्तोढ्वं स्तोमिआ ' असें म्हणावें, आणि ' मे अवीवृधध्वम् ' यांचा संधि पादांतीं करूं नये, म्हणजे ऋचा श्लोकाप्रमाणें म्हणतां येईल.

सूक्तम् १२५.

इदं सूक्तं दानदेवताकम् । कक्षीवान् दैर्घतमस ऋषिः । त्रिष्टुप् छन्दः । चतुर्थीपञ्चम्यौ तु जगत्यौ ॥

प्राता रत्नं प्रातरित्वा दधाति तं चिकित्वान्प्रतिगृह्या नि धत्ते । तेन प्रजां वर्धयमान आयू रायस्पोषेण सचते सुवीरः ॥ १ ॥

प्रातरिति । रत्नम् । प्रातःऽइत्वा । दधाति । तम् । चिकित्वान् । प्रतिऽगृह्य । नि । धत्ते ।
तेन । प्रऽजाम् । वर्धयमानः । आयुः । रायः । पोषेण । सचते । सुऽवीरः ॥ १ ॥

भाषायाम्.

१. प्रातरित्वा (=अतिथिः) प्रातः (=प्रातःकाले) रत्नम् (=उत्तमं धनं) दधाति (=ददाति)। तं [रत्नं) चिकित्वान् (=ज्ञातवान्) [अपरः] प्रतिगृह्य (=गृहीत्वा) नि धत्ते (=नि दधाति=स्वीकरोति)। तेन (=रत्नेन) प्रजां (=स्वकीयं संततिम्) आयुः (=आयुश्च=स्वकीयं शरीरं च) वर्धयमानः (=वर्धयन् सन्) सुवीरः (=शोभनपुत्रपौत्रादिभिर्युक्तः सन्) रायस्पोषेण (=धनस्य पुष्ट्या =वृद्ध्या) सचते (=संगच्छते=तेन सह युक्तो भवति)॥

अत्र सायणः। अत्रेतिहासमाचक्षते । दैर्घतमसः कक्षीवान्नाम ऋषिर्ब्रह्मचर्यं चरिष्यन्वेदाभ्यासाय गुरुकुले चिरकालमुषित्वा वेदान्सम्यगधीत्य व्रतानि च चरित्वा तेनानुज्ञातः पुनः स्वगृहं प्रति प्रयास्यन् मध्ये मार्गे रात्रौ विश्रान्तः। प्रभाते भावयव्यस्य पुत्रः स्वनयो नाम राजानुचरैः संक्रीडमानोऽकस्मात्कक्षीवतोऽन्तिकमाससाद। स च रभसा प्रतिबुद्धः सहसोत्तस्थौ। तं च राजा पाणिं गृहीत्वा स्वकीये चासन उपवेश्यास्य सौन्दर्यमवगत्य स्वकन्याप्रदानमनाः पप्रच्छ भगवन् कस्य पुत्रः किंनामा त्वमिति। स च पृष्टो मातरं पितरं च स्ववृत्तान्तं चाचचक्षे। स च राजा संभाव्य इत्यवगत्य मुदितमनाः स्वगृहं प्राप्यास्मै मधुपर्कमारचय्य वस्त्रमाल्यादिभिः पूजयित्वा सरथा दश कन्याः शतं निष्कानश्वशतं पुंगवानां शतं गवां षष्ट्युत्तरसहस्रं पुनरेकादश रथांश्च प्रादात्। स च सर्वमनुक्रमेण प्रतिगृह्य दीर्घतमसोऽन्तिकमागत्य तस्मै प्रादर्शयत् ॥ ......स्वनयो नाम राजा प्रातरित्वा प्रातरेवात्मनः सकाशमागतः सन् रत्नं रमणीयं निष्कादिकं प्रातः प्रभातकाले दधाति। अस्मत्संनिधौ स्थापयति।

सूक्त १२५.

ऋषि–**कक्षीवान्** (पूर्वसूक्ताचाच कर्ता). देवता–**दान**. वृत्त–**त्रिष्टुभ्**; मात्र चवथी आणि पांचवी ह्या **जगती** होत.

१. अतिथि पहांटेस उत्तम संपत्ति देतो; ती पाहून [हा] स्वीकारून घेऊन ठेवितो. आणि तिच्या योगानें आपली प्रजा आणि आपलें आयुष्य वाढवितो, आणि उत्तम शौर्यवान् अशा पुत्रपौत्रांसह धनाच्या उत्कर्षाप्रत पावतो.

Hymn 125.

To *Largesses*. By *Kakshîvân*, son of *Dîrghatamas*. Metre—*Trishtubh*, except verses 4, 5 where it is *Jagatî*.

1. In the morning the morning-guest bestows excellent wealth, which the other sees and accepts and keeps. With it he nourishes [his] progeny and [his own] life; and blessed with good and brave progeny, he obtains the prosperity of wealth.

---

१. हें सूक्त दानाविषयीं आहे; म्हणजे यांत दानप्रशंसा केली आहे. सायणाचार्य म्हणतात कीं, कक्षीवान् ऋषि आपली विद्या संपादन करून गुरूच्या घरून आपल्या घरीं जात असतां मार्गांत निजला. तेथें ‘भावयव्य’ नांवाच्या राजाचा ‘स्वनय’ म्हणून पुत्र खेळत होता तो अकस्मात् त्याजवळ आला, आणि त्याचा वृत्तांत आणि कुळ गोत्र इत्यादि ऐकून घेऊन, त्याला आपल्या घरीं घेऊन जाऊन दहा कन्या आणि शंभर रथ, बैल, गाई, घोडे आणि शंभर निष्क (एक नाणें) हीं दिलीं. तें सर्व घेऊन कक्षीवान् आपल्या बापाजवळ निघून गेला, आणि त्याणें तें सर्व त्याला दाखविलें. आणि या आणि पुढच्या अशा दोन सूक्तांत ‘स्वनय’ राजपुत्राचें जें औदार्य त्याची प्रशंसा केली आहे.

या कथेला उद्देशूनच पहिल्या मंत्राचा अर्थ केला, तर ‘स्वनय’ पहांटेस आला, आणि त्याणें कक्षीवान् ऋषीला उत्तम संपत्ति दिली, ती कक्षीवान् याणें घेतली आणि बापाच्या पुढें नेऊन ठेविली. नंतर तिच्या योगानें तो उत्कर्षाप्रत पावला, आणि आपल्या पुत्रपौत्रांसहित सुखी झाला, असा भावार्थ समजावयाचा.

परंतु निदान ही पहिली ऋचा तरी तशा कथेला अनुलक्षून नसावी असें वाटतें. हें आणि पुढचें हीं दोन सूक्तें चमत्कारिक आहेत. प्रत्येकांत एकमे-

सुगुरसत्सुहिरण्यः स्वश्वो बृहदस्मै वय इन्द्रो दधाति ।
यस्त्वायन्तं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति ॥ २ ॥

सुऽगुः । असत् । सुऽहिरण्यः । सुऽअश्वः । बृहत् । अस्मै । वयः । इन्द्रः । दधाति ।
यः । त्वा । आऽयन्तम् । वसुना । प्रातःऽइत्वः । मुक्षीजयाऽइव । पदिम् । उत्ऽसिनाति ॥ २ ॥

ददाति । तं स्थापितं सर्वं चिकित्वान् चेतनावान् अदुष्टमित्यवगतवान् प्रतिगृह्य स्वीकृत्य निधत्ते । पितुः समीपे स्थापयति । अनन्तरं तेन दत्तेन निष्कादिना प्रजां पुत्रभृत्यादिरूपां वर्धयमानः पोषयन् आयुर्जीवितं च वर्धयन् सुवीरः शोभनैर्वीरैः पुत्रभृत्यादिभिरुपेतः सन् रायस्पोषेण धनानां पुनःपुनर्वर्धनेन सचते । असौ राजा संगच्छतामिति तव दातुराशिषं प्रार्थयते ॥

भाषायाम्.

२. हे प्रातरित्वः (=प्रातःकाल आगामिन्नतिथे), यो [राजा] आयन्तं त्वा (=गृहमागच्छन्तं त्वां) मुक्षीजया पदिमिव (=रज्जुना पक्षिणमिव) वसुना (=धनेन) उत्सिनाति (=प्रतिबध्नाति) [स] सुगुः (=शोभनगोभिस्तद्वान्) सुहिरण्यः (=शोभनसुवर्णेन युक्तः) स्वश्वः (=शोभनाश्वः=उत्कृष्टैरश्वैर्युक्तश्च) असत् (=भवतु) [अपि च] अस्मै (=तस्मै) इन्द्रो बृहत् (=प्रभूतं) वयः (=अन्नं) दधाति (=ददातु) ॥

" अत्र कक्षीवतः पितानीतेन धनेन संतुष्टो राजानं बहुप्रकारेणाशास्ते । असौ स्वनयो राजा सुगुरसत् । शोभनैर्बहुभिर्गोभिस्तद्वान् भवतु " इत्यादि सायणः ॥

काला असंबद्ध आणि अनन्वित असे मंत्र आहेत. १२५ व्या सूक्ताचे पहिले तीन मंत्र आणि शेवटचे चार यांचा संबंध वस्तुतः आहे असें म्हणण्यास कठिण पडतें. ४–७ हे मंत्र दक्षिणाप्रशंसापर आहेत खरे. पण १–३ हे तसे खरोखर दिसत नाहींत. हे तीन मंत्र प्रथम या सूक्ताचे नसतील, दुसरीकडचे असून संहिताकारांकडून येथें घातले गेले असावे. आणि दानप्रशंसेच्या सूक्तांत घातल्यामुळें त्यांचा ओढून ताणून अर्थ करावा लागत आहे. (१२६ व्या सूक्ताच्या शेवटच्या मंत्रावरील टीप पहा).

'आपली प्रजा आणि आपलें आयुष्य वाढवितो'='प्रजां वर्धयमानः'. 'आयुः

२. हे पहांटेला येणाऱ्या, तूं येत असतां तुला, दोरीनें शिकार बांधिल्याप्रमाणें, द्रव्यानें ज्याणें बांधिलें, तो उत्तम गाईंनीं, उत्तम सुवर्णानें, [आणि] उत्तम घोड्यांनीं संपन्न होओ; त्याला इंद्र मोठें अन्न देओ.

2. May he be blessed with excellent cows, blessed with excellent gold, blessed with excellent horses, and may Indra bestow plentiful food on him, who tied thee, O thou who arrivest in the morning, to wealth, even as a bird to a string.

प्रवर्धयमानः.' म्हणजे आपला आणि आपल्या संततीचा सुखानें निर्वाह चालवितो.

'अतिथि'='प्रातरित्वा.' म्हणजे सायणाचार्यांच्या म्हणण्याप्रमाणें स्वनय राजा, जो पहांटेस कक्षीवानाजवळ आला म्हणून त्याला 'प्रातरित्वा' असें म्हटलें आहे. पण पूर्वीं सांगितल्याप्रमाणें, या सूक्ताचा संबंध स्वनयाशीं अथवा भावयव्याशीं कांहींच नसेल. दोघांतून एकाचेंहि नांव या पहिल्या तीन ऋचांत आलेलें नाहीं. तेव्हां खरोखर ह्या तीन ऋचा कोणाला कोण बोलतो आहे हें समजण्यास मार्ग नाहीं.

२. सायणाचार्य म्हणतात, कक्षीवान् ऋषि याणें स्वनय राजानें दिलेली संपत्ति घेऊन बापाला (दीर्घतमसाला) दाखविली तेव्हां दीर्घतमसानें स्वनयाची केलेली प्रशंसा या मंत्रांत सांगितली आहे. त्याप्रमाणें या मंत्राचा भावार्थ असा आहे कीं, 'हे पहांटेला येऊन घरीं पोंहचणाऱ्या कक्षीवंता, तूं घरीं येत असतां, दोरीनें शिकार बांधिल्याप्रमाणें, तुला संपत्तीनें जणुं ज्या स्वनयानें बांधून टाकिलें तो स्वनय उत्तम गाई, घोडे इत्यादिकांनीं समृद्ध होओ आणि इंद्र त्याला उत्तम आणि पुष्कळ अन्नसंपत्ति देओ.'

परंतु 'पहांटेला येणारा' या विशेषणाचें स्वारस्य काय? आणि शिकारीची उपमा दिली आहे तिचें तात्पर्य काय? याखेरीज बाकी मंत्र उघडच आहे.

ऋग्वेदासारिख्या अतिपुराण ग्रंथांत एकाद्या सूक्तांत कितीएक मंत्र अथवा मंत्रांचे भाग दृष्टांताच्या दुर्बोधतेमुळें वगैरे समजण्यास कठिण अथवा अशक्यहि असले तरी नवल नाहीं. अशा अत्यंत प्राचीन ग्रंथाचे बहुतेक भाग समजण्यासारिखे आहेत इतक्याविषयींच आपण प्राचीनविद्यारक्षक ब्राह्मणांचे आभार मानिले पाहिजेत.

वृत्तासाठीं पहिल्या चरणांत 'सुअश्वो' असें वाचावें लागतें.

आयमद्य सुकृतं प्रातरिच्छन्निष्टेः पुत्रं वसुमता रथेन ।
अंशोः सुतं पायय मत्सरस्य क्षयद्वीरं वर्धय सूनृताभिः ॥ ३ ॥

आयम् । अद्य । सुऽकृतम् । प्रातः । इच्छन् । इष्टेः । पुत्रम् । वसुऽमता । रथेन ।

अंशोः । सुतम् । पायय । मत्सरस्य । क्षयत्ऽवीरम् । वर्धय । सूनृताभिः ॥ ३ ॥

भाषायाम्.

३. अद्य प्रातः (=अस्मिन् दिने प्रातःकाले) [अहम्] इष्टेः पुत्रम् (=" इष्टेरिष्टस्येष्टसाधनस्य यागस्य वा पुत्रं......कर्तारम् ") इच्छन् (=वाञ्छन्) [अहं] वसुमता रथेन (=धनयुक्तेन रथेन साधनेन) सुकृतं (=शोभनस्य कर्तारं प्रति) [त्वाम् ?] आयम् (=आगच्छम्) । [अतः कारणात्] मत्सरस्य (=मदकरस्य) अंशोः (=सोमवल्ल्याः) सुतम् (=अभिषुतं सोमरसं) [मां ?] पायय [अपि च] सूनृताभिः (=प्रियमधुराभिः स्तुतिरूपाभिर्वाग्भिः) क्षयद्वीरं (=शौर्योपेतपुत्रपौत्रादीनां पितृभूतं) वर्धय (=तोषय) ॥ इत्यक्षरार्थः ॥

सायणस्तु दुर्बोधाभिप्रायामिमामेवं व्याख्यातवान् । प्रातः पूर्वेद्युः प्रभातकालेऽयं धनं दत्तवान् तस्मिन्नेव काले सुकृतं शोभनस्य कर्तारं त्वामिच्छन् प्राप्तुमिच्छन् कदा द्रक्ष्यामीति कामयमानोऽहमद्यास्मिन्दिन इदानीमायम् । प्राप्तोस्मि । अत्र यद्यपि केवलं प्रातरित्येव श्रुतं न पूर्वेद्युरिति तथाप्यद्यायमित्युक्तत्वादर्थात्पूर्वेद्युः प्रातरिति गम्यते । कीदृशम् । इष्टेरिष्टस्येष्टसाधनस्य यागस्य वा पुत्रं पुरु त्रातारम् । पुत्रः पुरु त्रायत इति यास्कः । कर्तारमित्यर्थः । केन साधनेनेति तदुच्यते । वसुमता रथेन । समृद्धधनवता रथेन साधनेन । यद्वा तेन सहित इति सहार्थे तृतीया । किंच तदानीं तेन समृद्धेन धनेनांशोरंशुमतो वल्लीरूपस्य मत्सरस्य मादनसाधनस्य सोमस्य । मत्सरः सोमो मन्दतेस्तृप्तिकर्मण इति निरुक्तम् । तस्य सुतमभिषुतं रसं पायय । आत्मानं पायय । इष्टसाधनं सोमयागं कुर्वित्यर्थः । कृत्वा च क्षयद्वीरं क्षियन्तो निवसन्तो वीराः पुत्रभृत्यादयो यस्य तं तादृशं त्वदिष्टसाधनबहुधनप्रदातारं सूनृताभिः प्रियसत्यात्मिकाभिर्वाग्भिर्वर्धय । समृद्धं कुरु । पुत्रभृत्यादिवीरैर्यथा प्रवृद्धो भवति तथा कामयेत्यर्थः ॥

३. मी आज प्रातःकाळीं [तुज] इष्टिपुत्राची वांछा करून [तुज] पुण्यवंताप्रत धनानें भरलेल्या रथांत बसून आलों आहें. तर मादकारक वल्लीचा रस पाज, [आणि] शूर पुत्रांच्या पित्याला मधुर सूक्तांनीं संतुष्ट कर.

3. I have come today in the morning in a chariot filled with riches to the righteous man longing for the son of worship. Offer the juice of the exhilarating plant to drink, and delight the father of the brave sons with sweet hymns.

---

३. हाहि मंत्र वरच्या प्रमाणेंच कठिण आहे. यांत अवघड इतकें आहे कीं, कोण कोणाला बोलत आहे तें समजत नाहीं. शब्दांचा अर्थ सरळ अन्वयानें केला आहे त्याचा भावार्थ कोण कोणाला बोलत आहे तें समजल्याशिवाय कळणार नाहीं. रुद्र देव येऊन एकाद्या पुण्य आचरणाऱ्या उपासकाला बोलत आहे असें समजून ह्या मंत्राची व्याख्या केली, तर भावार्थ असा होईलः—‘ आज प्रातःकाळीं तुझी पुण्यवंताची इच्छा करून मी तुज सत्कर्माच्या पुत्राजवळ धनानें भरलेल्या रथांत बसून आलों आहें. तर मला मदकारक सोमरस पाज आणि मज शूर मरुतांच्या बापाला मधुर स्तोत्रें म्हणून संतुष्ट कर.’ असा हा मंत्र दुसऱ्या संदर्भाचा असतां संहिताकारांनीं या सूक्तांत घातला असें समजावयाचें कीं काय ?

सायणाप्रमाणें पहातां कक्षीवान् आपल्या पित्याप्रत बोलतो आहे, आणि म्हणतो कीं, हें मी धन आणिलें आहे त्याच्या योगानें सोम काढून इंद्राला (अथवा रुद्राला ?=क्षयद्वीरम्) अर्पण कर आणि मधुर स्तोत्रांनीं स्तव.

‘ इष्टिपुत्र ’=‘ इष्टेः पुत्रम्. ’ म्हणजे पुत्राप्रमाणें सत्कर्माला पाळणारा असें समजावयाचें काय ?

उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः ।
पृणन्तं च पपुरिं च श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः ४

उप । क्षरन्ति । सिन्धवः । मयःऽभुवः । ईजानम् । च । यक्ष्यमाणम् ।
च । धेनवः ।
पृणन्तम् । च । पपुरिम् । च । श्रवस्यवः । घृतस्य । धाराः । उप ।
यन्ति । विश्वतः ॥ ४ ॥

नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति ।
तस्मा आपो घृतमर्षन्ति सिन्धवस्तस्मा इयं दक्षिणा पिन्वते सदा ५

नाकस्य । पृष्ठे । अधि । तिष्ठति । श्रितः । यः । पृणाति । सः । ह ।
देवेषु । गच्छति ।
तस्मै । आपः । घृतम् । अर्षन्ति । सिन्धवः । तस्मै । इयम् । दक्षिणा ।
पिन्वते । सदा ॥ ५ ॥

भाषायाम्.

४. ईजानं (=सोमयागमनुतिष्ठन्तं) च यक्ष्यमाणं च (=यक्ष्य इति निश्चयं कुर्वन्तं च) मयोभुवः (=सुखोत्पादकाः) सिन्धवः (=नद्यः) धेनवः (=गावश्च) उप क्षरन्ति (=आगत्य स्रवन्ति=सोमयागमनुतिष्ठते यक्ष्य इति निश्चयं कुर्वते च पयो ददति)। [अपि च] पृणन्तं च पपुरिं च (=हविर्दत्तवन्तं च दानशीलं च) घृतस्य (=आज्यस्य) श्रवस्यवः (=अन्नसमृद्धिहेतवो) धाराः (=कुल्या) विश्वतः (=सर्वत) उप यन्ति (=आगम्य वहन्ति)॥

५. यः पृणाति (=दानेन जनान् पूरयति=दक्षिणां यो ददाति) [स] नाकस्य (=स्वर्गस्य) पृष्ठे श्रितः (=आश्रितः=आरूढः सन्) अधि तिष्ठति (=स्वामितया आस्ते)। स ह (=स खलु) देवेषु गच्छति (=स्वयमेव देवो भवति)। तस्मै आपः (=उदकानि मेघादेरुत्पन्नानि) [तथा] सिन्धवः (=नद्यो) घृतं (=घृतवद्रसम्) अर्षन्ति (=वाहयन्ति) [अपि च] तस्मै इयं दक्षिणा (=गोरूपं धनं) सदा (=नित्यं) पिन्वते (=पयसा पूरिता भवति=फलरूपेण दुग्धेन परिपूर्णा भवति)॥

इयं दक्षिणेत्यत्र किंचेयं भूमिरपि दक्षिणा सस्यादिफलसंपादनदक्षा सती सदा सर्वकालं पिन्वते। सेचयति। तोषयतीत्यर्थः। इति सायणः॥

४. जो यजन करितो, आणि जो यजन करीन असें मनांत आणितो, त्या दोघांहि जवळ सुखकारक नद्या [आणि] गाई दुभतात. हवि देणाऱ्याकडे आणि दान देणाऱ्याकडे घृताच्या समृद्धिकारक धारा चोहींकडून लोटतात.

4. To him who sacrifices, and to him who intends to sacrifice, blissful rivers [and] milch-cows send forth streams of milk. To him who sacrifices and to him who bestows largesses, plenteous streams of clarified butter flow from all sides.

५. जो [कोणी] दक्षिणा देतो, तो स्वर्गशिखराच्या पाठीवर चढून बसतो; [आणि] तो देवांमध्यें जाऊन मिळतो; त्यासाठीं उदकें [आणि] नद्या घृत वाहतात. त्यासाठीं ती दक्षिणा सदोदित रसभरित होत असते.

5. He who gives largesses stands on the top of heaven, ascended. He goes among the gods. To him the waters [and] the rivers flow in streams of fat. To him, the largess [given by him] is filled with milky reward.

---

४. ' जो कोणी यज्ञ करितो अथवा करावयाचा बेत करितो, त्याजकरितां मधुर नद्या वाहतात, आणि गाई पुष्कळ दूध देतात. जो कोणी हविर्दान करितो, आणि जो दान देतो, त्याजकडे पुष्टिकारक तुपाच्या धारा चारीहि बाजूंनीं वाहत येत असतात.' याप्रमाणें हविर्दानाची आणि दक्षिणेची प्रशंसा यांत आहे.

' सुखकारक नद्या '=' मयोभुवः सिन्धवः.' म्हणजे ज्यांपासून अन्नसमृद्धि होणार अशा नद्या. अथवा मेघोदकें असाहि अर्थ संभवतो. कारण मेघोदकांलाहि ' सिन्धवः ' असें नांव आहे.

या ऋचेचें वृत्त जगती आहे हें वर आरंभीं सांगितलेंच आहे.

५. यांत दानाची प्रशंसा आहे. 'जो दक्षिणा देतो, तो स्वर्गाच्या पाठीवर चढून तेथें मालक होऊन जणुं बसतो, आणि तो स्वतः देव होतो. त्याकारणें मेघोदकें आणि नद्या तुपाचे जणुं प्रवाह वाहवितात. त्यानें दिलेली जी दक्षिणा, म्हणजे दुभती गाय, ती नित्य दुधानें भरून राहते— म्हणजे तिजपासून त्याला नित्य विपुळ दुधाचा लाभ होत असतो.'

' स्वर्गशिखराच्या '=' नाकस्य. ' सू. ३४ मं. ८ याजवरील टीप पहा.

' ही दक्षिणा '=' इयं दक्षिणा.' म्ह-

दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः ।
दक्षिणावन्तो अमृतं भजन्ते दक्षिणावन्तः प्र तिरन्त आयुः ॥६॥

दक्षिणाऽवताम् । इत् । इमानि । चित्रा । दक्षिणाऽवताम् । दिवि । सूर्यासः ।
दक्षिणाऽवन्तः । अमृतम् । भजन्ते । दक्षिणाऽवन्तः । प्र । तिरन्ते । आयुः ॥ ६ ॥

भाषायाम्.

६. दक्षिणावताम् इत् (=दत्तदक्षिणानामेव) इमानि चित्रा (=इमानि दृश्यमानानि चित्राणि उत्तमानि "स्रक्चन्दनमणिमुक्तादिरूपाणि द्रव्याणि") [भवन्ति] । दक्षिणावतां (=दत्तदक्षिणानाम्) [एव] दिवि (=द्युलोके) सूर्यासः (=सूर्याः="सूर्यसंबन्धिनो लोका") [भवन्ति] । दक्षिणावन्तः (=दत्तदक्षिणा एव जना) अमृतं भजन्ते (=मरणरहितं स्थानं प्राप्नुवन्ति) । दक्षिणावन्तः (=दत्तदक्षिणा) [एव] आयुः (=स्वायुष्यकालं) प्रतिरन्ते (=वर्धयन्ति=दीर्घायुषो भवन्ति) ॥

णजे दात्यानें दिलेली जी 'दक्षिणा' म्हणजे दान दिलेली गाय ती. त्या दानामुळें दात्याला अनेक गाईंचा लाभ होतो आणि त्यांजपासून तो नित्य समृद्ध होतो.

हीहि ऋचा जगतीच आहे.

६. दक्षिणा देणाऱ्यांचींच हीं सुंदर [द्रव्यें] [होत], दक्षिणा देणाऱ्यांचेच द्युलोकांतील सूर्य [होत]. दक्षिणा देणारेच अमरत्व पावतात. दक्षिणा देणारेच दीर्घायु होतात.

6. To those who bestow largesses belongs this excellent creation. To those who bestow largesses belong the suns in heaven. Those who bestow largesses obtain immortality, those who bestow largesses prolong their lives.

---

६. यातहि दानाची प्रशंसा आहे. 'या जगतांत चंदन, पुष्पें, फळें इत्यादि जीं सुंदर द्रव्यें आहेत, तीं दक्षिणा देणाऱ्यांसाठींच निर्माण केलेलीं आहेत. द्युलोकांत जे अनेक सूर्य आणि तारे इत्यादि तेजःपुञ्ज गोल प्रकाशतात, ते दक्षिणा देणाऱ्यांसाठींच निर्माण केलेले आहेत. दक्षिणा देणारे लोकच अमर होतात—तेच चिरंजीव होत असतात.'

'दक्षिणा' शब्दाचा मूळ अर्थ 'अनुकूळ.' त्यावरून अनुकूळ होऊन दूध देणारी जी गाय, ती 'दुभती गाय.' नंतर यज्ञ करणारे यजमान लोक ऋत्विजांला अथवा सूक्तें रचणाऱ्या कवींला जी 'गाय' देत ती. ऋग्वेदांत 'दक्षिणा' शब्दाचा हाच अर्थ पुष्कळ ठिकाणीं आला आहे. ऋत्विजांस दान द्यावयाचें तें बहुतकरून दुभती गाय हेंच देण्यांत येत असे, म्हणून त्याचें नांव 'दक्षिणा' असें पडलें. नंतर यज्ञ केल्यावर ऋत्विजांला कोणत्याहि प्रकारचें दिलेलें धन त्यास 'दक्षिणा' म्हणूं लागले. पण या अर्थी 'दक्षिणा' शब्द क्वचित्च योजिलेला आढळतो. वेदोत्तरकाळीं या अर्थाची चांगली प्रसिद्धि झाली. मात्र इंद्रादिक देवांनीं भजकांस द्यावयाचें जें धन (तें बहुतकरून गोरूपच असे) त्याला 'दक्षिणा' असें म्हणत.

आतां तरी ब्राह्मणांला याज्ञिक कर्माच्या संबंधानें जें धन द्यावयाचें, त्यालाच 'दक्षिणा' असें म्हणतात. शूद्रादिक जनाला दिलेल्या दानाला दक्षिणा म्हणत नाहींत.

ह्या ऋचेचा पाठ विवाहांत 'दीर्घायुसूक्त' म्हणून म्हणतात त्या वेळीं करितात. परंतु आयुष्य वाढो अशा आशीर्वादाचे शब्द यांत नाहींत; केवळ 'प्र तिरन्ते आयुः' हे जे शब्द आहेत, त्यांजवरून पाठ म्हणण्याचा प्रघात भिक्षुकांनीं घातला आहे. सू. ९२ मं. १० आणि त्याजवरील टीप पहा.

वृत्तासाठीं दुसऱ्या चरणांत 'सूरिआसः' असें म्हणावें लागतें.

मा पृणन्तो दुरितमेन आरन्मा जारिषुः सूरयः सुव्रतासः ।
अन्यस्तेषां परिधिरस्तु कश्चिदपृणन्तमभि सं यन्तु शोकाः ७॥१०

मा । पृणन्तः । दुःऽइतम् । एनः । आ । अरन् । मा । जारिषुः ।
यद्ध त्यामङ्गिरोभ्यो धेनुं देवा अदत्तन ।
वि तां दुह्रे अर्यमा कर्तरी सचाँ एष तां वेद मे सचा ॥ ७ ॥

ओ इति । सु । नः । अग्ने । शृणुहि । त्वम् । ईळितः । देवेभ्यः । ब्रवसि । यज्ञियेभ्यः । राजऽभ्यः । यज्ञियेभ्यः ।
यत् । ह । त्याम् । अङ्गिरःऽभ्यः । धेनुम् । देवाः । अदत्तन ।
वि । ताम् । दुह्रे । अर्यमा । कर्तरि । सचा । एषः । ताम् । वेद । मे । सचा ॥ ७ ॥

भाषायाम्.

७. हे अग्ने, नः (=अस्माकमाह्वानम्) ओ षु शृणु (=आगम्य शोभनं यथा तथा शृण्वेव)। [अस्माभिर्] ईळितः (=स्तुतस्त्वं) यज्ञियेभ्यः (=यज्ञार्हेभ्यो) देवेभ्यो ब्रवसि (=अस्मत्कर्म अस्मत्पक्षे वा ब्रूयाः=वद)—यज्ञियेभ्यः (=यज्ञार्हेभ्यो) राजभ्यः (=राजभूतेभ्यो) [देवेभ्यो] [ब्रवसि=ब्रूयाः]। हे देवाः, यत् ह त्यां (=यां प्रसिद्धां) धेनुं (=गां) [यूयम्] अङ्गिरोभ्यो अदत्तन (=दत्तवन्तः) तां (=यां च) कर्तरि सचा अर्यमा दुह्रे (=यजमानेन सह अर्यमा देवो दुदोह) तां (=तादृशीं) [धेनुं] मे सचा एष (=मत्समवाय एषोऽर्यमा) वेद (=जानाति=“अर्यमाहमपि जानामि”)॥

इदानीं देवाः प्रत्यक्षेणोच्यन्ते। अत्रेतिहासमाहुः। अङ्गिरसो नाम महर्षयः पूर्वं यज्ञार्थं देवान् स्तुत्या प्रीणयित्वा गा अयाचन्त। ते प्रीताः कामदुघां प्रादुः। लब्धां च तां धेनुं क्षीरं दोग्धुमशक्नुवाना अर्यमणं देवं प्रार्थयन्। स च प्रार्थितोऽग्निहोत्राद्यर्थं क्षीरं दुदोहेति। तदिदमत्रोच्यते। ...... एष एवार्यमा तां धेनुं मे सचा मत्समवायेन वेद। जानाति। अर्यमाहमपि जानामीत्यर्थः। ईदृशी धेनुस्त्वदर्थमेव दुह्यत इत्यग्नेः स्तुतिः। इति सायणः॥

७. हे अग्नी, तूं येऊन आमचें आह्वान ऐक. आम्हीं स्तविलेला जो तूं, तो यजनीय देवांप्रत [आम्हांविषयीं] [सांग].—यजनीय देवराजांप्रत [आम्हांविषयीं] [सांग]. हे देव हो, तुम्हीं जी ती गाय अंगिरसांला देते झालां, आणि जिचें अर्यमा आणि यजमान यांनीं मिळून दूध काढिलें—त्या [गाई]ला त्यानें आणि मी शोधून काढिलें आहे.

7. Do come and hear our [hymn], O Agni. Praised by us, thou shalt speak [in our behalf] to the adorable gods—to the adorable kings [of heaven]. For that cow which you gave, O gods, to the Angirases, and which Aryaman milked in company with the sacrificer,—that cow he (Aryaman) and I have found out.

---

७. ही ऋचा अग्नीविषयीं आणि दुसऱ्या देवांविषयीं आहे. ' हे अग्नी, तूं ये, आणि आम्ही कसें यजन करितों आहों आणि कशी स्तुति करीत आहों तें पाहून दुसऱ्या देवांला सांगून त्यांसहि इकडे घेऊन ये.—हे देव हो, तुम्ही पूर्वी अंगिरस नांवाच्या ऋषींला जशा प्रकारची गाय दिली, आणि तिचें दूध अर्यमा देवानें अंगिरसाबरोबर काढिलें, तसलीच गाय आतां आम्हीं आणिली आहे, आणि तशा गाईचें दूध काढून तुम्हांकरितां हवि सिद्ध केलें आहे. तर तुम्ही या, आणि हें ग्रहण करा' असा अभिप्राय.

पण शेवटच्या म्हणजे तिसऱ्या चरणाचा अर्थ स्पष्ट समजत नाहीं. आम्हीं सायणांस अनुसरून अर्थ केला आहे. ते म्हणतात, पूर्वी अंगिरसांला देवांनीं एक गाय ' कामधेनु ' दिली. तिचें दूध त्यांस काढावयाला येईना तेव्हां तें अर्यमा देवानें काढिलें. तसलीच गाय आतां अर्यमा याणें संपादन केली आहे, आणि तिच्या दुधापासून आजचें हें आमचें हवि तयार केलें आहे इत्यादि.

कसेंहि असो (म्हणजे अर्यमा यानें प्रस्तुत मंत्र म्हणणाऱ्या उपासकासहित दुसरी अथवा तसली गाय कशीहि संपादन केलेली असो), पण इतकें निःसंशय खरें दिसतें कीं, अंगिरसांनीं पूर्वी देवांनीं दिलेल्या ज्या गाईचें दूध काढून देवांस हवि अर्पण केलें, तसल्या अथवा त्याच गाईचें दूध काढून त्याचें हवि आज सिद्ध केलें आहे, यास्तव सर्व देवांनीं यावें; असा ऋषीचा अभिप्राय आहे; आणि अंगिरसांला देवांनीं एक चमत्कारिक गाय दिली होती अशा

मो षु वो अस्मदभि तानि पौंस्या सना भूवन्द्युम्नानि मोत जारिषुरस्मत्पुरोत जारिषुः ।
यद्वश्चित्रं युगेयुगे नव्यं घोषादमर्त्यम् ।
अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता यच्च दुष्टरम् ॥ ८ ॥

मो इति । सु । वः । अस्मत् । अभि । तानि । पौंस्या । सना । भूवन् । द्युम्नानि । मा । उत । जारिषुः । अस्मत् । पुरा । उत । जारिषुः । यत् । वः । चित्रम् । युगेऽयुगे । नव्यम् । घोषात् । अमर्त्यम् । अस्मासु । तत् । मरुतः । यत् । च । दुस्तरम् । दिधृत । यत् । च । दुस्तरम् ॥ ८ ॥

भाषायाम्.

८. [हे मरुतः], तानि (=प्रसिद्धानि) सना (=सनातनानि=पुरातनानि) पौंस्या (=पौंस्यानि=प्रबलानि साहाय्यानि) मो षु [अस्मत्] अभि भुवने (=अस्मत्सकाशात् मैवापगच्छन्तु) उत (=अपि च) द्युम्नानि (=युष्मद्दत्तानि यशांसि) मा जारिषुः (=मा जीर्णानि भवन्तु)—अस्मत् पुरा (=अस्मभ्यं पूर्वमेव=अस्माकं मरणात्पूर्वमेव) मा जारिषुः (=मा जीर्णानि नष्टानि भवन्तु) । [अपि च] यत् (=यद्यद्) वः (=युष्माकं) चित्रं (=मनोहरं) [धनं] युगेयुगे (=प्रत्येकस्मिन् युगे=मनुष्याणां सर्वस्मिन्नायुष्यकाले) नव्यम् अमर्त्यं (=नूतनं मरणरहितं) [चेति] घोषात् (=घोष्येत=कीर्त्येत=प्रसिद्धं स्यात्) यच्च (=यद्यच्च) दुष्टरं (=शत्रुभिर्जेतुं दुःखेन शक्यं)—यच्च दुष्टरं (=यद्यच्च शत्रुभिस्तरीतुं जेतुम् अशक्यं) [धनं] दिधृत (=धारयत=प्रयच्छत) तत् (=तत्तत्सर्वं) हे मरुतः, [यूयम्] अस्मासु (=अस्मास्वेव) [दिधृत=धारयत=प्रयच्छत] ॥

पौंस्या पौंस्यानि बलानि । इति सायणः । अस्मत् पुरा पुराणि लक्षणया तत्रस्थाः प्राणिनः इति घोषात् घोषाः । व्यत्ययेन पञ्चमी । शब्दोपेता गवादयो घोषोपलक्षिता ग्रामनगरादयो वेति च तस्य चिन्त्यतरम् ॥

काहीं कथेला उद्देशून ऋषि बोलतो आहे हेंहि निर्विवाद दिसतें.

‘ आणि जिनें ’=‘ ताम्. ’ अक्षरशः ‘ तिला ’ अथवा ‘तिनें ’ इतकाच आहे, पण ‘ यत् त्वां ’ याचा ‘ तच्छब्द ’ खरोखर ‘ एष तां वेद मे सचा ’ यांतच आहे, त्यापूर्वी नाहीं.

‘ यजमान ’=‘कर्तरि.’ ऋ. ६. १९.

८. [हे मरुतांनो], तुमचीं [जीं] तीं जुनीं पाठबळें, [तीं] [आम्हांपासून] न जाओत; आणि [तुम्हीं दिलेलीं] यशें नष्ट न होओत —आम्ही [मरण्या]पूर्वींच नष्ट [न] होओत. जो जो तुमचा उत्तम [अनुग्रह] प्रत्येक पिढींत नवा [आणि] अमर्त्य [असा] गाजतो, [आणि] जें [शत्रूंनीं] जिंकण्यास कठीण [असें],—जें [जें] [शत्रूंनीं] जिंकण्यास कठीण [असें] [धन] तुम्ही देत असतां, तें [तें] हे मरुतांनो, तुम्ही आम्हांला द्या.

8. May those your ancient strong helps never depart [from us]; and may the splendors [given by you] never perish—[never] perish before we [die]. Whatever [favours of] yours are renowned [as] new [and] immortal in every generation, [and] whatever [is] unassailable —whatever unassailable [good] you confer, bestow all that upon us, O Maruts.

१ आणि भाष्य पहा.

'त्यानें आणि मी '=' एष मे सचा.' 'एष मयि सचा' असें असावें. 'मयि'-च्या ठिकाणीं 'मे' आहे अथवा 'मयि'चाच अपभ्रंश वृत्ताकरितां 'मे' असा झाला असें समजावयाचें कीं काय? 'सचा' आलें म्हणजे तृतीया किंवा सप्तमी येते.

वृत्तासाठीं 'देवेभिओ' आणि दोन्ही ठिकाणीं 'यज्ञियेभिओ,' 'अङ्गिरोभिओ' असें म्हणावें लागतें.

८. ही ऋचा मरुतांविषयीं आहे. भावार्थः—'हे मरुतांनो, तुमचें जें सामर्थ्यवान् पाठबळ फार दिवसांपासून आम्ही उपभोगीत आहों, तें आम्हांला सोडून न जाओ; आणि तुम्ही जें अनेक प्रकारचें वैभव आम्हांस दिलें आहे, तें आम्ही मरण्यापूर्वीं नष्ट न होओ, तर आम्ही जीवंत असेपर्यंत आम्हांपाशींच स्थिर राहो. आणि पिढीदरपिढींत जें जें म्हणून तुम्ही उत्तम ऐश्वर्य देतां,आणि जें नवें आणि अमर होय असें गाजतें, आणि जें जें वैभव शत्रूंहीं अजिंक्य असें देत असतां,तें तें सर्व तुम्ही आम्हांला द्या.'

'आम्ही मरण्यापूर्वीं'='अस्मत् पुरा.' अक्षरशः 'आम्हांपूर्वीं,' 'आमच्या अगोदर.' हा अर्थ उघड असतां सायणांनीं 'आमचीं नगरें' असें भाष्य केलें आहे.

दध्यङ् ह मे जनुषं पूर्वो अङ्गिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदु-
स्ते मे पूर्वे मनुर्विदुः ।
तेषां देवेष्वायतिरस्माकं तेषु नाभयः ।
तेषां पदेन मह्या नमे गिरेन्द्राग्नी आ नमे गिरा ॥ ९ ॥

दध्यङ् । ह । मे । जनुषम् । पूर्वः । अङ्गिराः । प्रियऽमेधः । कण्वः ।
अत्रिः । मनुः । विदुः । ते । मे । पूर्वे । मनुः । विदुः ।
तेषाम् । देवेषु । आऽयतिः । अस्माकम् । तेषु । नाभयः ।
तेषाम् । पदेन । महि । आ । नमे । गिरा । इन्द्राग्नी इति । आ । नमे ।
गिरा ॥ ९ ॥

भाषायाम्.

९. दध्यङ् (=अथर्वगोत्रोत्पन्न एतन्नामा महर्षिः) पूर्वः अङ्गिराः (=पुरातनः अङ्गिरा नाम महर्षिः) प्रियमेधः कण्वः अत्रिः मनुर्ह [इत्येते] मे जनुषं (=मम जन्म) विदुः (=जानन्ति)—मनुस् ते [चान्ये] पूर्वे (=पूर्वपुरुषा) मे [जनुषं] (=मम जन्म) विदुः (=जानन्ति) । तेषाम् आयतिः (=दीर्घकालसंबन्धो) देवेषु (=इन्द्रादिषु) [आसीत्] अस्माकं नाभयः (=पूर्वबन्धवस्) तेषु (=मन्वादिषु पूर्वेषु) [आसन्] । तेषां (=मन्वादीनां) पदेन (=मार्गेण) गिरा (=स्तुत्या) महि (=अत्यधिकम्) आ नमे (=नमामि)—गिरा (=स्तुत्या) इन्द्राग्नी (=इन्द्रमग्निं च) आ नमे (=संभजे) ॥

सायणस्त्वेवमाख्यातवान् । दध्यङ् अथर्वगोत्रोत्पन्न एतन्नामको महर्षिः स च पूर्वः पूरकः सर्वस्य पुरातनो वा । अङ्गिरा अङ्गारः । तद्वत्तेजस्वीत्यर्थः । यद्वा अङ्गारा एवाङ्गिरसोऽभवन् येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्निति श्रुतेः । अङ्गिरा अङ्गारा अङ्कना अञ्चना इति निरुक्तम् । एतन्नामा महर्षिश्च प्रियमेधो मेधाप्रियः । प्रियमेधः प्रिया अस्य मेधाः । नि० ३. १७ । इति यास्कः । स च कण्वो मेधावी स चात्रिर्दुःखत्रयरहितः । अत्रिर्न त्रय इति निरुक्तम् । ३. १७ । मनुर्मननवान् एतन्नामा महर्षिः । एते सर्वे महात्मानो महर्षयो मे जनुषं दिवोदासपुत्रस्य परुच्छेपस्य जन्म विदुः । जानन्ति ॥ ...... किंच ते पूर्वोक्ताः पूर्वकालीना मे अस्मत्पित्रादीञ्जानन्त इत्यर्थः । मनुर्मनवो ज्ञानवन्तो यतस्ते पूर्वे मनवश्च अतो विदुरिति भावः ॥ तेषां ज्ञान उपपत्तिमाह । तेषां दध्यगादीनां देवेष्वितरेषु देवनशीलेषु महर्षिषु मध्य आ-

९. दध्यङ्, पुरातन अङ्गिरा, प्रियमेध, कण्व, अत्रि [आणि] मनु [हे] माझी उत्पत्ति जाणतात— मनु [इत्यादिक] ते प्राचीन [ऋषि] माझी [उत्पत्ति] जाणतात. त्यांचा संबंध देवांशीं [असे]; आमचे पूर्व बन्धुजन त्यांजमध्यें [असत]. त्यांच्या रीतीनें स्तुति म्हणून मी फार विनवितों—स्तुति म्हणून इंद्राग्नींला फार विनवितों.

9. Dadhyanch, ancient Angiras, Priyamedha, Kaṇva, Atri [and] Manu know my origin—Manu [and] those [other] ancients know my [origin]. They had very ancient relation with the gods, our forefathers were among them. In their footsteps I humbly propitiate with prayer—propitiate Indra and Agni with prayer.

'प्रत्येक पिढींत'='युगेयुगे.' 'युग' शब्दाचा पिढी हा जो अर्थ येथें केला आहे, तो लक्ष्यांत ठेवावा. वेदांत 'युग' म्हणजे 'कलियुग,' 'द्वापरयुग' इत्यादि लांबलांब युगें विवक्षित नाहींत; तर 'पिढी,' 'डोई' असा अर्थ असतो. सू. ९२ मं. ११ सू. १०३ मं. ४ याजवरील टीप पहा.

'गाजतो'='घोषात्.' 'घोषात्' हें 'घुष्' धातूपासून झालेलें कर्मणि लेट्चें रूप आहे. प्रत्यय कर्तरि, पण अर्थ कर्मणि आहे. 'घोषात्' असें क्रियापदी रूप ऋक्संहितेंत पुनःहि आलेलें आहे. ऋ. ५. ३७. ३ यांत 'आस्य श्रवस्यात् रथ आ च घोषात्' असें आहे तें पहा. सायणांनीं 'घोषात्' म्हणजे "घोषोपलक्षिता ग्रामनगरादयः" असा अगदींच क्लिष्ट अर्थ केला आहे.

वृत्तासाठीं 'पौंसिआ' आणि 'अमर्तिअम्' असें म्हणावें लागतें.

९.भावार्थः—'पुरातन असे दध्यङ्, अंगिरा, प्रियमेध, कण्व, अत्रि, मनु, हे जे ऋषि, त्यांस माझें जन्म कोणापासून झालें तें ठाऊक आहे. त्यांचा संबंध देवांशीं प्रत्यक्ष असे, आणि आमचे मूळ पुरुष मन्वादिकांमध्यें असत. यास्तव मी मन्वादिकांच्याच पद्धतीनें इन्द्राग्नींला भजतों.'

'दध्यङ्' सू. ८० मं. १६, सू. ११६ मं. १२ इत्यादि पहा.

'अङ्गिरस.' सू. ३१ मं. १७, सू. ६२ मं. २ इत्यादि पहा.

'प्रियमेध.' सू. ४५ मं. ३, ४ पहा.

'कण्व.' सू. ३६ मं. १०, सू. ४७ मं. ५ इत्यादि पहा.

'अत्रि.' सू. ५१ मं. ३, सू. ११२ मं. ७ इत्यादि पहा.

'मनु.' सू. ३६ मं. १९, सू. ३१ मं. ४ इत्यादि पहा.

आपलें जन्म कोणापासून प्रथमतः

होता यक्षद्वनिनो वन्त वार्यं बृहस्पतिर्यजति वेन उक्षभिः पुरुवारेभिरुक्षभिः ।
जगृभ्मा दूरआदिशं श्लोकमद्रेरध त्मना ।
अधारयदररिन्दानि सुक्रतुः पुरू सद्मानि सुक्रतुः ॥ १० ॥

होता । यक्षत् । वनिनः । वन्त । वार्यम् । बृहस्पतिः । यजति । वेनः । उक्षऽभिः । पुरुऽवारेभिः । उक्षऽभिः ।
जगृभ्म । दूरेऽआदिशम् । श्लोकम् । अद्रेः । अध । त्मना ।
अधारयत् । अररिन्दानि । सुऽक्रतुः । पुरु । सद्मानि । सुऽक्रतुः ॥ १० ॥

यतिर्दीर्घकालसंबन्धोऽस्ति । अतो विदुरित्यर्थः । ततश्च किमित्याह । अस्माकं नाभयो जीवेन सह संबन्धवन्तः प्राणाः फलेन संबद्धा यागा वा तेषु तेष्वेव वर्तन्ते । असौ विशिष्टजन्मा वो यज्ञयोग्य इति तैर्वक्तव्यत्वेन तदधीनत्वम् । तेषां दध्यगादीनां पदेनास्पदेन महत्त्वेन निमित्तेन गिरा स्तुतिरूपया वाचा महि महदत्यधिकं नमे । नमामि । सर्वो जनः । किंच तेषामनुग्रहाद्यज्ञयोग्यः सन् इन्द्राग्नी गिरा स्तुतिरूपया वाचा युक्तः सन्ना नमे । आभिमुख्येन नमामि स्तौमि । नमामि चेत्यर्थः । नमेर्व्यत्ययेनात्मनेपदम् । यद्वा कर्मकर्तरि न दुहस्नुनमामिति यकः प्रतिषेधः । स्वयमेव नतोस्मि ॥

भाषायाम्.

१०. होता (=बृहस्पतिरूपो देवानामाह्वाता) यक्षत् (=यजतु) । [तथा कृते सति] वनिनः (=दानशीला देवा) वार्यं (=सर्वैर्वरणीयं धनं) वन्त (=अस्मभ्यं दद्युः=दास्यन्ति) । वेनः (=अस्मान् कामयमानः=अस्मदनुग्रहीता) बृहस्पतिः (=दैव्यो होता) उक्षभिः (=सेचनसमर्थैर्वीर्यवद्भिः=प्रबलैः सोमैर्) यजति (=देवान् पूजयति)—पुरुवारेभिः उक्षभिः (=बहुभिर्वरणीयैः समर्थैः सोमैर्) [यजति] । अध (=अथ=इदानीं) [तेन प्रयुक्तस्य] अद्रेः (=ग्राव्णो) दूरआदिशं (=दूरप्रदेशं==दूरगामिनं) श्लोकं (=नादं) त्मना (=आयासं विना) जगृभ्म (=गृह्णीमः=शृणुमः) । [अनन्तरं] सुक्रतुः (=शोभनप्रज्ञो) [बृहस्पतिः] अररिन्दानि (=मेघोदकानि) अधारयत् (=धारयति=उपासकानामर्थं लब्ध्वा तेभ्यो ददाति)—सुक्रतुः (=शोभनप्रज्ञो) [बृहस्पतिः] पुरू सद्मानि (=पुरूणि निवासस्थानानि) [यजमानानामर्थम्] [अधारयत्=लब्ध्वा ददौ] ॥

१०. [बृहस्पतिरूप] होता यजन करो, [मग] उदार देव इष्ट धन देतील. कृपाळु बृहस्पति प्रबळ [सोमांनीं] यजन करितो— सर्वांनीं ज्यांची वांछा करावी अशा प्रबळ सोमांनीं यजन करितो. मग आपणाला पाषाणाचा दूर पोंहचणारा आवाज आपले आपण ऐकूं येत असतो. उत्तम बुद्धिमान् बृहस्पति [मेघांतील] उदकें घेतो—पुष्कळ घरें घेतो.

10. May [Bṛihaspati] the invoker conduct the sacrifice: the bounteous [gods] shall bestow the wished for [wealth]. Loving Bṛihaspati conducts the sacrifice with the strong [Somas]—with the strong [Somas] that are desired by many. We then hear the noise of the [Soma-pressing] stone, reaching afar. Wise Bṛihaspati has obtained the waters—the wise one [has obtained] numerous habitations.

झालें तें कांहीं टाऊक नाहीं, पण आपले वाडवडील दध्यङ्, अङ्गिरा, मनु इत्यादि जे पुरातन ऋषि, त्यांपैकीं होते, आणि ते (मन्वादिक) जसे देवांस भजत तसे इन्द्राग्नींला वगैरे आम्ही आतां भजतों, ती रीत कशीहि असो, वाडवडिलांपासून चालत आलेली आहे; ती देवांस मान्य होओ, असा ऋषीचा अभिप्राय आहे.

या ऋचेवरून हें सूक्त जेव्हां रचिलें गेलें तेव्हां दध्यङ्, अङ्गिरा, प्रियमेध, कण्व, अत्रि, आणि मनु हे अति प्राचीन काळीं होऊन गेलेले ऋषि होत असें मानीत असत, आणि परुच्छेप, अथवा प्रस्तुत सूक्ताचा जो कोण कर्ता असेल तो, त्या प्राचीन ऋषींच्या मागून फार दिवसांनीं झाला असें अनुमान केलें पाहिजे.

वृत्तासाठीं दुसऱ्या चरणांतील दोन्हीं पोटचरण पदपाठाप्रमाणें म्हणावे लागतात. त्याप्रमाणेंच तिसऱ्या चरणांतील पहिला पोटचरणहि पदपाठांत आहे तसा म्हणावा.

---

१०. हा मंत्र दुर्बोध आहे. मुळांतील निर्देश फार संक्षिप्त असल्यामुळें कोणता भाग कोणाविषयीं आहे तें स्पष्ट समजण्यास अडचण आहे. 'बृहस्पति' हा देवांला आणण्याविषयीं आणि त्यांस हवि आणि सोम अर्पण करून प्रसन्न करण्याविषयीं फार कुशल आहे, यासाठीं तो येऊन आमचा आजचा यज्ञ

ये दे॑वासो दि॒व्येका॑दश॒ स्थ पृ॑थि॒व्यामध्येका॑दश॒ स्थ ।
अ॒प्सु॒क्षितो॑ महि॒नैका॑दश॒ स्थ ते दे॑वासो य॒ज्ञमि॒मं जु॑षध्वम् ॥ ११ ॥ ४ ॥ २० ॥

ये । दे॒वा॒सः॒ । दि॒वि । एका॑दश । स्थ । पृ॒थि॒व्याम् । अधि॑ । एका॑दश । स्थ ।
अ॒प्सु॒ऽक्षितः॑ । म॒हि॒ना । एका॑दश । स्थ । ते । दे॒वा॒सः॒ । य॒ज्ञम् । इ॒मम् । जु॒ष॒ध्व॒म् ॥ ११ ॥ ४ ॥ २० ॥

बृहस्पतिरूपो होतास्माकं यज्ञं निष्पाद्य देवांस्तर्पयतु । ते च तस्य सोमपानेन प्रसादिताः सन्त उदारा देवा अस्मभ्यं मेघोदकानि तथा गृहादीनि धनानि ददत्विति भावः ॥

अररिन्दानि । उदकनामैतत् । ...... । वृष्टिलक्षणान्युदकानि त्मना आत्मना धारयत् । धारयति । इत्यादि सायणाचार्याः ॥

भाषायाम्.

११. हे देवासः (=देवाः), ये [यूयं] दिवि (=द्युलोके) [महिना=महिम्ना] एकादश स्थ, [ये] पृथिव्याम् अधि (=भूलोके) [महिना=महिम्ना] एकादश स्थ, [अपि च] [ये] महिना (=महिम्ना=महत्त्वेन) अप्सुक्षितः (=अन्तरिक्षनिवासिन) एकादश स्थ, ते [सर्वे मिलित्वा] इमम् [अस्माकं] यज्ञं जुषध्वं (=सेवध्वं=संभजध्वम्) ॥

चालवो. त्याणें यज्ञ चालविला म्हणजे देव आम्हांला धनसंपत्ति देतील. बृहस्पति येओ आणि यज्ञ चालवो असें आम्ही म्हणतों, यांत कांहीं विशेष नाहीं; कारण तो देव तें काम नित्य करीत असतोच, तें असें:–तो फार मादकारी सोम काढितो आणि यजन करीत असतो. तो असें करूं लागला म्हणजे मंत्र्यांचा ध्वनि दूरपर्यंत पोंहचतो आणि जनांच्या कानांवर पडतो. आणि मग तो मेघोदकें आणि अनेक घरें मनुष्यांकरितां आपल्या यजनाच्या योगानें संपादन करून देतो ' असा भावार्थ दिसतो.

' बृहस्पति. ' स्तोत्र आणि स्तोत्र उच्चारून जें यजनकर्म करावयाचें असतें, त्याची अभिमानिनी जी देवता, म्हणजे तद्रूपच जो देव, तो 'बृहस्पति.' तेव्हां त्याणें येऊन यज्ञ चालवावा, मग देव प्रसन्न होतील अशी प्रार्थना करणें साहजिक

११. हे देव हो, तुम्ही जे द्युलोकीं अकराजण [मोठेपणानें] राहत आहां, [आणि] पृथिवीवर अकराजण [मोठेपणानें] राहत आहां, [आणि] अंतरिक्षांत वास करणारे अकराजण मोठेपणानें राहत आहां, ते तुम्ही, हे देव हो, हा [आमचा] यज्ञ मान्य करून घ्या.

11. Ye, O gods, that are eleven [with majesty] in heaven, are eleven [with majesty] on earth, [and] live eleven [of you] with majesty in the firmament, do ye, O gods, enjoy this sacrifice.

आहे. सू. १४ मं. ३ आणि त्याजवरील टीप पहा.

'पुष्कळ घरें घेतो '=' पुरू सद्मानि अधारयत्.' म्हणजे उपासकांकरितां पुष्कळ घरें मिळवून देतो, असा भावार्थ दिसतो.

वृत्ताकरितां 'वार्यं 'च्या ठिकाणीं 'वारिअं ' असें म्हणावें.

---

११. हा येथें या सूक्ताचा उपसंहार झाला. 'हे देव हो, तुम्ही सर्व मोठे आहां; तुम्हांतून जे अकराजण द्युलोकीं राहतात, जे अकराजण पृथिवीवर राहतात, आणि जे अकराजण अंतरिक्षांत वास करितात, ते सर्वजण मिळून तुम्ही आज हा आमचा यज्ञ मान्य करून घ्या'.

याप्रमाणें तेहतीस देवांविषयीं ही ऋचा आहे. आणि त्यांतून तीन भाग असून अकरा पृथिवीवर, अकरा अंतरिक्षांत, आणि अकरा द्युलोकांत याप्रमाणें राहतात.

सू. ३४ मं. ११ यांतहि देव तेहतीस आहेत असें सांगितलें आहे (आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना).

सू. ४५ मं. २ यांतहि देव तेहतीस आहेत असें सांगितलें आहे. (त्याजवरील टीप पहा).

ऋ. ३. ६. ९ यांत 'पत्नीवन्तास्त्रिंशतं त्रींश्च देवान्...आ वह'(='हे अग्नी, तेहतीस देवांला त्यांच्या पत्न्यांसहित आण)' असें म्हटलें आहे.

ऋ. ८.२८. १ यांत 'ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन् '=' जे तीस आणि तीन देव आमच्या कुशासनावर बसले ' असें म्हटलें आहे. शिवाय ऋ. ८. ३०. २ (ये स्थ त्रयश्च त्रिंशच्च), ऋ. ८. ३५. ३, ९. ९२. ४, हेहि मंत्र पहा.

हे मूळचे तेहतीस देव प्रथम असतां त्यांचे वेदोत्तरकालीन ग्रंथांत, म्हणजे पुराणादिकांत तेहतीस कोटी केले, तेव्हां या अशा संबंधानें पाहिलें असतांहि पुराणांच्या अत्यंत अतिशयोक्तीचेंहि बीज

सूक्तम् १४०.

उचथ्यस्य पुत्रो दीर्घतमा ऋषिः । अग्निर्देवता । अन्त्ये त्रिष्टुभौ । दशमी त्रिष्टुब् जगती वा । शिष्टं सूक्तं जागतम् ।

वेदिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये ।
वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनम् ॥१

वेदिऽसदे । प्रियऽधामाय । सुऽद्युते । धासिम्ऽइव । प्र । भर । योनिम् । अग्नये ।

वस्त्रेणऽइव । वासय । मन्मना । शुचिम् । ज्योतिःऽरथम् । शुक्रऽवर्णम् । तमःऽहनम् ॥ १ ॥

भाषायाम्.

१. [हे अध्वर्यो], वेदिषदे (=वेद्यां सीदते) प्रियधामाय (=प्रियधाम्ने=नित्यं प्रियस्थानासीनाय) सुद्युते (=शोभनं यथा तथा द्योतमानाय) अग्नये धासिमिव (=हविर्लक्षणमन्नमिव) योनिं (=वेद्याख्यं स्थानम्) आ भर (=प्रहर=प्रयच्छ) । [अपि च] शुचिं (=शुद्धं) ज्योतीरथं (=ज्योतिरेव रथो यस्य तं) शुक्रवर्णं (=दीप्तवर्णं) तमोहनम् (=अन्धकारस्य हन्तारं) [तमग्निं] वस्त्रेणेव मन्मना वासय (=स्तोत्रेणाच्छादय) ॥

प्रियधामाय प्रियधाम्ने प्रियस्थानायोत्तरवेदिलक्षणप्रियाय......वासय ।...वस्त्रेण यथा गोपनीयं वस्तु गोपयन्ति तद्वत्तमग्निं वासय । निवासय स्थापय । मन्मना मननीयेन हव्येन वस्त्रसदृशेन मृदुकाष्ठादिनाच्छादय वा । कीदृशम् । ज्योतीरथम् । दीप्तिरथोपेतम् । इति सायणः ॥

वेदांत आहे असें म्हटल्यास चिंता नाहीं. सू. ३४ मं. ११ याजवरील टीप पहा.

'अंतरिक्षांत वास करणारे'=' अप्सुक्षितः.' अक्षरशः 'उदकांत वास करणारे.' मेघोदकें बाष्परूपानें ज्यांत असतात ते प्रदेश, म्हणजे अंतरिक्ष प्रदेश, अथवा अंतरिक्षच; त्यालाहि 'अपः' अथवा 'उदकें' अशीच संज्ञा वेदांत आहे. आधुनिक काळीं स्वर्ग, पृथिवी आणि पाताळ असें जें त्रैलोक्य प्रसिद्ध आहे, त्यांतून उदकमय जें पाताळ म्हणजे भूमीखालचा लोक, तो वेदांत नाहीं. वेदांत सांगितलेला जो उदकबाष्पमय अंतरिक्षलोक, त्यापासून आधुनिक पाताळ, पुराणकर्त्यांनीं रचिला असावा.

हा शेवटचा मंत्र श्राद्धसंकल्पांत अ-

सूक्त १४०.

ऋषि—उचथ्याचा पुत्र दीर्घतमा. देवता—अग्नि. वृत्त—जगती, मात्र शेवटच्या दोन ऋचा त्रिष्टुभ्, दहावी त्रिष्टुभ् अथवा जगती.

१. वेदीवर बसणारा, त्याला जें प्रिय स्थान तसल्या स्थानावर आरूढ होणारा, [आणि] फार प्रकाशणारा [जो] अग्नि, [त्या]ला हवीप्रमाणें आसन आणून दे. शुचिर्भूत, ज्योतीरथ, शुभ्रवर्णाचा, [आणि] अंधकाराचा नाश करणारा [जो अग्नि, त्या]ला वस्त्रानें [आच्छादिल्या]प्रमाणें स्तोत्रानें आच्छाद.

HYMN 140.

To *Agni*. By *Dîrghatamas*, the son of *Uchathya*. Metre—*Jagatî*, except verses 12 and 13 where it is *Trishṭubh*; verse 10 is either in the *Jagatî* or the *Trishṭubh*.

1. Offer a seat as well as oblation to Agni, who sits on the altar, who is given the seat that he loves, who is very brilliant. Clothe him with a hymn as with a garment—[him] who is bright, whose chariot is his flame, who is of brilliant colour, [and] who destroys darkness.

ननिवेदनाच्या वेळीं म्हणतात.

या ऋचेचें वृत्त त्रिष्टुभ् आहे. दुसऱ्या पादांत 'पृथिविआम् अधि एकादश' असें वाचावें लागतें.

---

१. आतां परुच्छेपाचीं सूक्तें संपून दीर्घतमा या ऋषीचीं लागलीं. तीं पुढें १६४ व्या सूक्तापर्यंत चालतील.

या पहिल्या मंत्रांत ऋषि आपल्या जवळ उभा असलेल्या अध्वर्यूला अथवा त्यासारिख्याच दुसऱ्या कोणा तरी मनुष्याला बोलत आहे. 'हे मित्रा, ज्या अग्नीला, आवडतें तेंच वेदिरूप स्थान नित्य जन देत असतात, त्याला तूं हवि आणि वेदिरूप आसन दे. आणि ज्योति हाच ज्याचा रथ, आणि जो तेजःपुञ्ज असा होय त्या अग्नीला, वस्त्रानें प्रावरण घातल्याप्रमाणें स्तोत्राचें प्रावरण घाल.'

'हवीप्रमाणें आसन'='धासिमिव योनिम्.' म्हणजे हवि आणि आसन असें समजलें पाहिजे.

ह्या आणि पुढल्या चोवीस सूक्तांचा ऋषि जो 'दीर्घतमा' ऋषि, तो उचथ्याचा पुत्र असें अनुक्रमणिकेस अनुसरून वर सांगितलें आहे; पण पुत्र म्हणजे मुलगाच असें समजणें अवश्य नाहीं, अपत्य अथवा त्या कुळांत जन्मलेला इ-

अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमी पुनः ।
अन्यस्यासा जिह्वया जेन्यो वृषा न्यन्येन वनिनो मृष्ट वारणः२

अभि । द्विऽजन्मा । त्रिऽवृत् । अन्नम् । ऋज्यते । संवत्सरे । ववृधे । जग्धम् । ईम् इति । पुनरिति ।
अन्यस्य । आसा । जिह्वया । जेन्यः । वृषा । नि । अन्येन । वनिनः । मृष्ट । वारणः ॥ २ ॥

भाषायाम्.

२. द्विजन्मा (=द्वयोर्द्यावापृथिव्योर्जातं) त्रिवृत् (त्रिप्रकारम्) अन्नम् अभि ऋज्यते (=प्राप्नोति) । संवत्सरे (=संवत्सरे पूर्णे) जग्धं (=भक्षितम्) ईम् (=एतदन्नं) पुनः (=पुनरपि) वावृधे (=वर्धयति) । अन्यस्य (=अग्नेः=एकस्याग्नेः) आसा (=आस्ना=मुखेन) जिह्वया [च] जेन्यो वृषा (=श्रेष्ठो वीरो) [भवति] अन्येन (=दावाग्निना च=दावाग्निरूपेण च) वारणः (=प्रबलः सोऽग्निः) वनिनः (=वृक्षान्) नि मृष्ट (=निमार्ष्टि=दहति) ॥

द्विजन्मा । द्वाभ्यामरणीभ्यां जायमानत्वात् । यद्वा मथनेनाधानसंस्कारेण चोत्पन्नत्वाद् द्विजन्मत्वम् । ...... त्रिवृदन्नमाज्यपुरोडाशसोमरूपेण त्रिप्रकारमन्नमदनीयमभि ऋज्यते । प्राप्नोति । ...... पुनर्ववृधे । अग्निर्वर्धयति । जीर्णस्य पुनर्वृद्ध्यभावाद्यजमानं हविर्वृद्ध्या प्रतिसंवत्सरं यागसमर्थं करोतीत्यर्थः । ...... किंचायमग्निर्वृषा वर्षकः सन् अन्यस्य हविष आसा आस्येन जिह्वया जेन्यः प्रभूतो भवतीति शेषः । यद्वा वर्षिता सन् एकेन रूपेणान्यस्य यज्ञे होत्रादेर्जिह्वया तदुपलक्षितया स्रुचा जेन्यो प्रवृद्धो भवति । तथान्येन दावाग्निरूपेण वारणः सर्वेषां वारकः सन् वनिनो वनसंबन्धिनो वृक्षान्निमृष्ट । निमार्ष्टि । दहतीत्यर्थः । इति सायणः ॥

तर्केंच विवक्षित असेल. 'दीर्घतमा' याचें आडनांव 'औचथ्य' म्हणजे 'उचथ्या'चा पुत्र अथवा वंशज, असें आहे. या दीर्घतमा ऋषीचीं येथें सांगितलेलीं पंचवीस सूक्तें ऋग्वेदांत आहेत, त्याशिवाय दुसरीं नाहींत. पूर्वी जो कक्षीवान् ऋषि सांगितला आहे (सू. ११६–१२५), तो याच दीर्घतमा ऋषीचा पुत्र असावा. दीर्घतमा ऋषीला 'मामतेय' म्हणजे 'ममता' या नांवाच्या स्त्रीचा पुत्र असेंहि नांव आहे.(सू. १५८ मं. ६).

२. दोघांपासून जन्मलेल्या अग्नीला त्रिगुण अन्न प्राप्त होतें. खाल्लेलें अन्न एक वर्षांत पुनः तो वाढवितो. तो एका [विस्तवा]च्या तोंडानें आणि जिभेनें उत्तम सामर्थ्यवान् होतो, आणि तो प्रबळ अग्नि दुसऱ्या विस्तवाच्या योगेंकरून वनवृक्ष जाळून टाकितो.

2. Agni born of the two obtains the three-fold food. He augments again in a year the food eaten. He becomes a noble hero through the mouth and tongue of one [fire] —and powerful [Agni] burns down the forest-trees through another.

---

२. 'विजेच्या रूपानें द्युलोकीं जन्मणारा, आणि विस्तवाच्या रूपानें पृथिवीवर जन्मणारा जो अग्नि, त्याला तीन प्रकारचें अन्न प्राप्त होतें तें तो खातो, आणि तें खाल्लेलें अन्न पुनः एक वर्षांत तो वाढवितो. तो एका रूपानें (म्हणजे यज्ञांत पेटविला जातो त्या रूपानें) हविरन्न भक्षून भजकांला साहाय्य करणारा सामर्थ्यवान् वीर होतो; आणि दुसऱ्या रूपानें, म्हणजे दावानलरूपानें अरण्यांतील वृक्ष जाळून टाकितो.'

'दोघांपासून जन्मलेल्या'=' द्विजन्मा.' म्हणजे आकाश आणि पृथिवी या दोहोंत जन्मलेला. म्हणजे विजेच्या रूपानें आकाशांत आणि विस्तवाच्या रूपानें पृथिवीवर. सू. ६० मं. १ व टीप पहा. अथवा 'अरणी' नांवाच्या ज्या लांकडांत अग्नि मंथून काढीत, त्या दोघींपासून उत्पन्न झालेला. हाच अर्थ अधिक संभाव्य दिसतो. पुढच्या ऋचेंत जें अग्नीच्या दोघां आईबापांविषयीं सांगितलें आहे, त्यावरून 'दोघांपासून जन्मलेला' म्हणजे 'दोन्ही अरणींपासून जन्मलेला' हाच अर्थ येथें विशेष म्हणीय दिसतो.

'त्रिगुण अन्न'=' त्रिवृत् अन्नम्.' म्हणजे तीन प्रकारचें अन्न. सायण म्हणतात, पुरोडाश, आज्य (तूप) आणि सोम हीं जीं तीन प्रकारचीं अन्नें, तीं त्रिगुण अन्नें होत.

'खाल्लेलें अन्न पुनः तो वाढवितो'= 'ववृधे जग्धं पुनः.' याचा अभिप्राय नीट समजत नाहीं. अग्नीला जसजसें हवीच्या रूपानें अन्न खावयाला घालावें, तसतसें तो वार्षिक पिकाच्या रूपानें वाढवून यजमानाला देतो, असा भावार्थ असावा.

वृत्तासाठीं 'जेन्यो'च्या ठिकाणीं 'जेनिओ' असें म्हणावें, आणि चवथा चरण पदपाठांत आहे तसा म्हणावा.

कृष्णप्रुतौ वेविजे अस्य सक्षिता उभा तरेते अभि मातरा शिशुम् ।
प्राचाजिह्वं ध्वसयन्तं तृषुच्युतमा साच्यं कुपयं वर्धनं पितुः ॥ ३ ॥

कृष्णऽप्रुतौ । वेविजे इति । अस्य । सऽक्षितौ । उभा । तरेते इति ।
अभि । मातरा । शिशुम् ।
प्राचाऽजिह्वम् । ध्वसयन्तम् । तृषुऽच्युतम् । आ । साच्यम् । कुपयम् ।
वर्धनम् । पितुः ॥ ३ ॥

भाषायाम्.

३· अस्य [अग्निरूपस्य शिशोः] कृष्णप्रुतौ (=मथनोपक्रमेऽग्निसंपर्कात्कृष्णवर्णतां प्राप्नुवत्यौ) वेविजे (=भीते) सक्षितौ (=समाननिवासे) उभा (?=उभे) मातरा (=मातरौ=उभे अप्यरण्यौ) प्राचाजिह्वं (=प्राग्देशस्थितं जिह्वास्थानीयज्वालं) ध्वसयन्तं (=तमो निवारयन्तं) तृषुच्युतम् (=अरणीभ्यां क्षिप्रं निर्गच्छन्तम्) आ साच्यं (=समवेतव्यं च) कुपयं (=गोपनीयं) पितुर्वर्धनं (=पितृस्थानीयस्य यजमानस्य वर्धयितारं) शिशुं (=बालम्=एतम् अग्निम्) अभि तरेते (=आभिमुख्येन प्राप्नुतः) ॥

इमां प्रायोदुर्बोधामृचं सायण एवं व्याख्यातवान् । अस्याग्नेर्मातरा मातृस्थानीये उत्पादयित्र्यावुभा उभे अरण्याख्ये मातरौ वेविजे । चलतः । ओविजी भयचालनयोः । अस्माद्यङ्लुगन्तात् व्यत्ययेनात्मनेपदमेकवचनं च । लोपस्त आत्मनेपदेष्विति तलोपः । चादिलोपे विभाषेति निघाताभावः । मथनोपक्रमे कृष्णप्रुतावग्निसंपर्कात्कृष्णवर्णतां प्राप्नुवत्यौ प्रापयन्त्यौ वा भूमिम् । तथा सक्षितौ समानकार्यमग्न्युत्पादनं गच्छन्त्यौ । एवंभूते मातरौ शिशुं शिशुवदुत्पत्तिसमयेऽत्यल्पमग्निमभितरेते । आभिमुख्येन प्राप्नुतश्च । कीदृशं शिशुम् । प्राचाजिह्वम् । प्राग्देशस्थितजिह्वास्थानीयज्वालम् । ध्वसयन्तम् । तमो नाशयन्तम् । तृषुच्युतम् । अरणीभ्यां क्षिप्रं निर्गच्छन्तम् । अक्लेशेन योनेः सकाशात् शीघ्रमुत्पद्यमानम् । आ ईषत् साच्यं समवेतव्यं मृदुकाष्ठचूर्णादिना । कुपयं गोपनीयं पितुः पालकस्य यजमानस्य वर्धनं प्रवर्धनं प्रवर्धयितारम् । उक्तप्रकारैर्लौकिकशिशुसाधारणैरुपेतं शिशुमग्निं मातरावुत्पादयत इत्यर्थः । इति

३. याचे काळे झालेले, भ्यालेले, एकमेकांस चिकटून राहणारे दोघेहि आईबाप या मुलाजवळ येतात; जो पूर्वेकडेस जिह्वा टाकणारा, चपळ उड्या मारणारा, आणि सहवासाला योग्य, गोपन करण्यास योग्य, [आणि] पित्याचा उत्कर्ष करणारा [आहे].

3. Both the parents of this boy,—both darkened, frightened, living close to each other, approach him,— the boy who throws out his tongue towards the east, removes darkness, bounds about quickly, sociable, fit to be protected and a bringer of joy to his father.

---

३. हीहि ऋचा फार दुर्बोध आहे. इजमध्यें तात्पर्य इतकें दिसतें कीं, 'अग्नीचीं आईबापें होत अशा ज्या अरणी त्यांच्या पोटांतून अग्नि झटकन् उडी मारून बाहेर पडल्याबरोबर त्यांस त्याची भीति उत्पन्न होते, तथापि त्याची काळजी घेण्याकरितां म्हणून आणि त्याचें लालन करण्याकरितां म्हणून त्या त्याजजवळ येतात.' परंतु यांतील बहुतेक अग्नीचीं आणि अरणींचीं विशेषणें दुर्बोध आहेत. त्यांविषयीं पुढें पहा.

'काळे झालेले'='कृष्णप्रुतौ.' म्हणजे सायणाचार्य म्हणतात कीं, अग्नीच्या जन्मामुळें ज्यांत रंग काळा झाला आहे. दुसरे प्रयोग नाहींत.

'भ्यालेले'='वेविजे.' 'वेविजे' हें 'वेविज' शब्दाचें स्त्रीलिंगी प्रथमेचें द्विवचन समजून अर्थ केला आहे. सायणांनीं द्विवचनी क्रियापद घेतलें आहे. क्रियापद घ्यावें तर तें एकवचनी आहे. विशेषण घ्यावें तर तें स्त्रीलिंगी होऊन 'उभा' हें पुंल्लिंगी आहे. अशा रीतीनें दोहींकडून अडचणच आहे.

'एकमेकांस चिकटून राहणारे'='सक्षितौ.' याचींहि प्रयोगान्तरें नाहींत. अरणी ह्या स्वभावतः एकत्र राहणाऱ्या होत. कारण जसा पाटा वरवंटा, तशा अरण्या परस्पर संबद्ध होत.

'पूर्वेकडेस जिव्हा टाकणारा'='प्राचाजिह्वम्.' याविषयींहि दुसरे प्रयोग नाहींत. पूर्वेकडे अग्नीला पेटविल्यामुळें हें विशेषण लाविलें आहे.

'गोपन करण्यास योग्य'='कुपयम्.' हा शब्द वेदांत पुनः आलेला नाहीं. आम्हीं सायणानुसारें अर्थ केला आहे. 'ज्याचें प्रतिपालन केलें पाहिजे तो' असा भावार्थ दिसतो.

'पित्याचा उत्कर्ष करणारा'='पितुर्वर्धनम्.' म्हणजे यजमान अग्नीला खावयास आणि प्यावयास देतो म्हणून तो त्याचा बाप होय; आणि अग्नि त्याचें कल्याण करितो म्हणून तो त्याचा उ-

मुमुक्ष्वो३ मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ जुवः ।
असमना अजिरासो रघुष्यदो वातजूता उप युज्यन्त आशवः॥४॥

मुमुक्ष्वः । मनवे । मानवस्यते । रघुऽद्रुवः । कृष्णऽसीतासः । ऊं इति । जुवः ।

असमनाः । अजिरासः । रघुऽस्यदः । वातऽजूताः । उप । युज्यन्ते । आशवः ॥ ४ ॥

भाषायाम्.

४. मुमुक्ष्वः (=बन्धनान्मुक्तिम् इच्छन्तो) रघुद्रुवः (=क्षिप्रं गच्छन्तः) कृष्णसीतासः (=कृष्णसीताः=कृष्णमार्गा) ऊ (=उत=अपि च) जुवः (=जवनशीला) असमनाः (=भिन्नभिन्नदिङ्मुखा) अजिरासः (=अजिराः=गमनशीला) रघुष्यदः (=क्षिप्रगमना) वातजूताः (=वायुप्रेरिता) आशवः (=अश्वा) मानवस्यते मनवे (=मनुष्यान् आत्मन इच्छते भक्ताय=तदर्थम्) उप युज्यन्ते (=अग्निरथे नियुज्यन्ते)॥

असमनाः । असमानमनस्काः । काश्चन [ज्वालाः] प्राङ्मुख्यो गच्छन्ति । काश्चन प्रत्यङ्मुख्य इति विविधमनस्काः । व्यत्ययेनैकवचनम् । यद्वा असमना भिन्नवर्णाः । भिन्नवर्णत्वं च तत्रैव श्रूयते । काली कराली च मनोजवा च सुलोहिता या च सधूम्रवर्णा स्फुलिङ्गिनी विश्वभुवी च देवी लेलायमाना इति सप्त जिह्वा इति । इति सायणः॥

४. मोकळे होण्याविषयीं इच्छा करणारे, सहज धांवणारे, काळ्या मार्गानें चालणारे, आणि वेगवंत, अनेक दिशांकडे तोंडें असलेले, चपळ, सत्वर धांवणारे, [आणि] वातवेगी [असे] [अग्नीचे] वारू मनुष्यप्रिय यजमानासाठीं रथाला जोडिले जातात.

4. Agni's horses, desirous of being let go, running swiftly, leaving a dark track behind them as they go, swift, with faces turned in different directions, quick in motion, lightly flying, [and] propelled by the wind, are harnessed [to the chariot] for the sake of the worshipper, who loves men.

त्कर्ष करणारा होय असें म्हटलें आहे असें जें सायणांनीं सांगितलें आहे, त्याप्रमाणें समजणें अवश्य आहे.

एकंदरींत ही ऋचा अति कठिण आहे.

वृत्तासाठीं चवथ्या चरणांत 'साच्यं'-च्या ठिकाणीं 'साचिअं' असें वाचावें लागतें.

४. अग्नीच्या ज्या ज्वाला, अथवा त्याचे जे स्फुलिंग, तेच कोणीएक घोडे कल्पून ते घोडे अग्नीला भक्ताकडेस घेऊन येतात असें या ऋचेंत सांगितलें आहे. वरच्या मंत्राप्रमाणेंच यांत पुष्कळ विशेषणें आहेत. आणि तीं 'चपळ' आणि 'सत्वर धांवणारे' या अर्थाचीं प्रायः आहेत.

'मोकळे होण्यासाठीं इच्छा करणारे'='मुमुक्ष्वः.' म्हणजे, उंचा घोडा असला म्हणजे त्याला रथाला जोडिल्याबरोबर तो धांवण्यास पाहतो, तसे हे अग्नीचे घोडे रथास जोडिले जाऊन सत्वर धांवण्याविषयीं उतावीळ होणारे असें तात्पर्य आहे.

'काळ्या मार्गानें चालणारे'='कृष्णसीतासः.' म्हणजे अग्नि अथवा अग्नीचे घोडे—म्हणजे त्याच्या ज्वाळा, ज्या मार्गानें जातील तेथील गवत वगैरे जळून जातें, आणि तितका मार्ग काळा होत असतो. म्हणून अग्नीला 'कृष्णपथ' असें नांव पडलें आहे.

'अनेक दिशांकडे तोंडें असलेले'='असमनाः.' म्हणजे अग्नीच्या कितीएक ज्वाळा अथवा त्याचे स्फुलिंग पूर्वाभिमुख असतात, कितीएक पश्चिमाभिमुख असतात, आणि कितीएक दुसरीकडेस तोंड असल्याप्रमाणें दिसतात, असा अभिप्राय.

'वातवेगी'='वातजूताः.' म्हणजे वाऱ्याप्रमाणें वेगवंत. अक्षरशः अर्थ 'वायूनें प्रेरित,' वारा ज्यांस ढकलून देतो अथवा हाकतो असे.

'मनुष्यप्रिय यजमानासाठीं'='मानवस्ते मनवे.' अक्षरशः 'मनुष्यांची

आदस्य ते ध्वसयन्तो वृथेरते कृष्णमभ्वं महि वर्पः करिक्रतः ।
यत्सीं महीमवनिं प्राभि मर्मृशदभिश्वसन्स्तनयन्नेति नानदत् ॥५॥५

आत् । अस्य । ते । ध्वसयन्तः । वृथा । ईरते । कृष्णम् । अभ्वम् ।
महि । वर्पः । करिक्रतः ।

यत् । सीम् । महीम् । अवनिम् । प्र । अभि । मर्मृशत् । अभिऽश्व-
सन् । स्तनयन् । एति । नानदत् ॥ ९ ॥ ९ ॥

भाषायाम्.

५. यत् सी (=यदा खलु) [अग्निर्] महीम् अवनिं (=महतीं पृथिवीम्) अभि मर्मृशत् (=अभितः पुनःपुनरामृशत्) अभिश्वसन् (=अभितः श्वासध्वनिं कुर्वन्) स्तनयन् (=भुगुभुगुध्वनिं कुर्वन्) नानदत् (=ततोपि च महान्तं ध्वनिं कुर्वन्) एति (=गच्छति), आत् (=तदानीम्) अस्य (=तस्य) ध्वसयन्तः (?="तमांसि ध्वसयन्तस्") ते (=अश्वाः) कृष्णं (=कृष्णवर्णम्) अभ्वम् (=अभिभवद्गमनमार्गं) महि (=महत्) वर्पः (=रूपं) करिक्रतः (=अतिशयेन प्रादुर्भावयन्तः सन्तो) वृथा ईरते (=अनायासेनेतस्ततो गच्छन्ति) ॥

आदनन्तरमस्य स्तूयमानस्याग्नेस्ते प्रसिद्धा विस्फुलिङ्गा वृथा सहैवेरते । सर्वतो गच्छन्ति । ...... अभिश्वसन् सर्वतश्चेष्टमानः । ...... यदेतस्ततो जिह्वाभिर्लेलिहानो भुगुभुगुध्वनिं कुर्वन् ज्वलति तदैव विस्फुलिङ्गा उद्गच्छन्तीत्यर्थः । इति सायणः॥

इच्छा करणारा जो मानवी यजमान, त्यासाठीं ' असा अर्थ. हें विशेषण ऋषि आपल्या यजमानविशेषाला, म्हणजे एका व्यक्तीला अनुलक्षून जर लावीत असेल, तर ' ज्याला मनुष्यांची आवड आहे अशा ह्या आमच्या यजमानासाठीं ' अशा अर्थी विशेषण चांगलें जुळतें, पण जर तसें नसून साधारण यजमानाविषयीं असेल, तर मात्र या विशेषणाचें प्रयोजन स्पष्ट समजत नाहीं.

वृत्तासाठीं ' मुमुक्षवो ' असें वाचावें.

५. जेव्हां तो पृथिवीला चाटीत चाटीत [आणि] फुसफुसत [आणि] भुगुभुगु असा ध्वनि करीत [आणि] गर्जना करीत करीत जातो, तेव्हां त्याचे ते तमोनाशक [घोडे] [आपलें] काळें, भयंकर [आणि] मोठें रूप प्रगट करीत करीत सहज उडून जात असतात.

5. When [Agni] goes touching [and] licking the great earth, [and] hissing, rattling, [and] rumbling, then those his [horses], the destroyers of darkness, easily fly about, exhibiting their black, terrific [and] great form.

---

५. 'जेव्हां अग्नि मार्गाला चाटीत चाटीत जणुं जातो, आणि जातांना प्रथम थोडा, मग जरा अधिक, मग त्याहून अधिक असा नाद करीत करीत चालतो, तेव्हां त्याचे विस्फुलिंगरूप घोडे आपलें मोठें आणि भयंकर स्वरूप प्रगट करीत करीत इकडे तिकडे उडतात, आणि अंधकार नाहींसा करितात' असा भावार्थ आहे.

'पृथिवीला '=' महीम् अवनिम्.' हा अर्थ सायणांस अनुसरून केला आहे. कितीएक विद्वान् 'प्रवाह' असा अर्थ करितात. त्यावरून 'मार्ग' असा अर्थ संभवतो.

'तमोनाशक '=' ध्वसयन्तः.' हा अर्थ सायणांस अनुसरून केला आहे. परंतु 'तमः' शब्द यांत नाहीं त्यावरून अर्थाविषयीं संशय आहे. कितीएक (पाश्चात्त्य विद्वान् 'फेकणारे' अथवा 'फेकल्याप्रमाणें उडणारे') असा अर्थ करितात.

भूषन्न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत् ।
ओजायमानस्तन्वश्च शुम्भते भीमो न शृङ्गा दविधाव दुर्गृभिः॥६॥

भूषन् । न । यः । अधि । बभ्रूषु । नम्नते । वृषाऽइव । पत्नीः । अभि । एति । रोरुवत् ।
ओजायमानः । तन्वः । च । शुम्भते । भीमः । न । शृङ्गा । दविधाव । दुःऽगृभिः ॥ ६ ॥

भाषायाम्.

६. यः [अग्निर्] भूषन् न (=? आत्मानमलंकुर्वन्निव) अधि बभ्रूषु (=बभ्रुवर्णास्वोषधीषु=काष्ठेषु) नम्नते (=प्रविशति) । वृषेव पत्नीः (=वृषा पत्नीर्यथा=वीर्यसेचनसमर्थो बलीवर्दो गाः प्रति यथा अभ्येति तथा) रोरुवद् अभि एति (=अत्यन्तं शब्दयन् ओषधीः प्रति गच्छति) । च (=अपि च) ओजायमानः (=स्वयं बलमिवाचरन्=स्वकीयं बलमाविष्कुर्वन्) तन्वः शुम्भते (=तनूः शोभयति स्वकीया ज्वालारूपा विभूतीरलंकरोति) । भीमो [मृगो] न (=भयंकरो मृग इव) दुर्गृभिः (=दुर्ग्रहः सन्) शृङ्गा दविधाव (=शृङ्गाणि अत्यन्तं चालयति) ॥

यथा कश्चित्स्त्रीकामो वृषभोत्यन्तं शब्दयन् गाः प्रति गच्छति स्वकीये शृङ्गे च चालयन् ताभ्यां स्वबलमाविष्कुर्वन् दुर्ग्रहो भाति तथैवायं स्त्रीकाम इव बभ्रुवर्णा ओषधीः प्रति दुर्ग्रहः सन् गच्छतीति भावः ॥

सायण एवं व्याख्यातवान् । योग्निर्बभ्रूषु बभ्रुवर्णास्वोषधीषु भरणकुशलासु वा जगताम् अधि अधिकं नम्नते । नमति । काष्ठानि प्रविशति । ...... भूषन्न । भूतान्येव स्वतेजसा भूषयन्निव । ...... तन्वश्च शुम्भते । स्वशरीरभूता ज्वाला अपि दीपयति । पोषयतीत्यर्थः । किंच प्रवृद्धज्वालो दुर्गृभिः केनचिदपि ग्रहीतुमशक्यः सन् भीमो न भयंकरो मृग इव स यथा दुर्ग्रहः सन् शृङ्गं चालयति तद्वदयमपि शृङ्गाणि शृङ्गवदुन्नता ज्वाला दविधाव । अत्यर्थं चालयति । इति ॥

६. जो [अग्नि] [आपणास] अलंकृत जणुं करून सांवळ्या रंगाच्या [ओषधींच्या] आंगीं शिरतो. बांगर बैल गाईकडेस [धांवतो] तसा तो मोठ्यानें डुरकत धांवतो. तो आपलें मोठें बळ प्रगट करीत करीत आपलें शरीर शोभवितो. कोणींहि धरण्यास कठिण [असा हा अग्नि], भयंकर [सावजा] प्रमाणें, [आपलीं] शिंगें हालवितो.

6. And he, as if decorating himself, enters into the brown plants. He runs even as a bull towards the cows, lowing loudly. And proudly manifesting his strength he adorns his person. Like a terrific beast he violently shakes his horns.

६. हा मंत्र कठिण आहे. पण भावार्थ बहुतकरून उघड दिसतो. तो असाः—' जसा एकादा माजलेला पोळ मोठ्यानें डुरकत गाईंच्या आंगावर धांवतो, आणि आंगची मस्ती दाखविण्याकरितां शिंगें इकडून तिकडे जोरानें हालवितो, आणि त्याला कोणी धरूं म्हटलें तर कोणाच्याहि हातीं सांपडण्याजोगा नसतो, तसा अग्नि समिधांच्या आंगावर धांवतो आणि कोणासच जुमानीत नाहीं, तर एकदम माजलेल्या पोळाप्रमाणें त्यांच्या आंगावर जाऊन पडतो.' अग्नि लांकडें जाळतो त्याचें हें वर्णन आहे.

'[आपणास] अलंकृत जणुं करून'=' भूषन्न.' हें विशेषण कठीण आहे. सायणाचार्य 'भुवनाला शोभविणारा' अथवा 'शोभविणारा' असा अर्थ करितात. भूषन् याचें कर्म उक्त नाहीं, तें कोणतें अध्याहृत घ्यावयाचें इतकेंच विचार्य आहे.

'आपलें शरीर शोभवितो'= 'तन्वः शुम्भते.' अक्षरशः अर्थ 'शरीरें शोभवितो.' म्हणजे शरीराच्या ठिकाणीं असणाऱ्या ज्या अग्नीच्या ज्वाळा, त्या शोभवितो.

'आपलीं शिंगें'=' शृङ्गा.' म्हणजे ज्वालांचे जे शेंडे वर दिसतात आणि शिंगांप्रमाणें हालतात, ते.

वृत्तासाठीं पहिल्या पादांत 'बभुरूषु' आणि 'अभि एति' असें दुसऱ्या पादांत आणि 'तनुअश्व' असें तिसऱ्यांत म्हणावें लागतें.

स संस्तिरो विष्टिरः सं गृभायति जानन्नेव जानतीर्नित्य आ शये ।
पुनर्वर्धन्ते अपि यन्ति देव्यमन्यद्वर्पः पित्रोः कृण्वते सचा ॥ ७ ॥

सः । सम्ऽस्तिरः । विऽस्तिरः । सम् । गृभायति । जानन् । एव । जानतीः । नित्यः । आ । शये ।

पुनः । वर्धन्ते । अपि । यन्ति । देव्यम् । अन्यत् । वर्पः । पित्रोः । कृण्वते । सचा ॥ ७ ॥

भाषायाम्.

७. सः (=अग्निः) संस्तिरः (=सहैव स्तीर्णाः=सहैव स्थिता) विस्तिरः (=विविधं स्तीर्णाः=भिन्नत्वेन स्थिता) [ज्वालाः] सं गृभायति (=संगृह्णाति)। जानन् एव (=ज्वाला जानन्नेव) जानतीः (=अग्निं जानतीर्) नित्यः (=अविच्छिन्नः सन्) आ शये (=आ शेते=ताभिः सह स्वपिति=शान्तो भवति)। [ताः] पुनर्वर्धन्ते (=मृताः सत्योपि परस्मिन्दिने पुनरपि वर्धन्ते) [अपि च] देव्यम् अपि यन्ति (=देवत्वं प्राप्नुवन्ति)। [तदनन्तरं] पित्रोः सचा (=पितृभ्यां सह=अग्नेः पित्रोर्द्यावापृथिव्योरुदितयोर् सत्योर्) अन्यत् वर्पः (=तेजस्वि रूपम्=अन्यद्रूपं) कृण्वते (=आविष्कुर्वते)॥

पुनर्वर्धन्त इत्यादौ एवंभूतज्वालाः पुनः पूर्वं प्रवृद्धा एव पुनरपि यागयोग्या यथा भवन्ति तथा वर्धन्ते। देव्यं यागादिव्यवहारयोग्यं स्तुत्यं वा अग्निमपि यन्ति। प्राप्नुवन्ति। यद्यप्यग्निज्वालयोरेकत्वं तथापि राहोः शिर इतिवदौपचारिको गन्तृगन्तव्यभावः। किंच एवं प्रवृद्धा ज्वाला ओषधयो वा सचा अग्निना सह पित्रोर्जगत्पालयित्रोस्ताभ्यां संभूय द्यावापृथिव्योरन्यत्पूर्वमविद्यमानं तेजोमयं वर्पो रूपं कृण्वते। कुर्वन्ति। लोकद्वयं स्पृशन्तीत्यर्थः। इति सायणः॥

७. तो एकत्र पडून राहिलेल्या [आणि] निरनिराळ्या पडून राहिलेल्या [ज्वाळां]ला एकाच ठिकाणीं घेतो. ओळखीचा [अग्नि] ओळखीच्या [ज्वाळां]वर नित्य निजतो. त्या पुन: वाढतात. त्या देवत्वाप्रत पावतात. त्या आईबापांबरोबर दुसरें रूप प्रगट करितात.

7. He takes together [the flames]—that lie together [and the flames] that lie separate. He continually lies on them, an acquaintance with acquaintances. They grow again. They attain to divinity. They exhibit another form in company with the two parents.

७. ही सुद्धा ऋचा गूढार्थ आहे. भावार्थ असा दिसतो कीं, 'अग्नि ज्वाळांला, म्हणजे काष्ठांला, आपल्या हातांमध्यें घेतो आणि त्यांजवळ निजतो, मग त्या एकत्र असोत अथवा एकमेकींपासून दूर दूर निजलेल्या असोत. हा त्यांच्या ओळखीचा असतो आणि त्या ह्याच्या ओळखीच्या असतात. त्या ज्वाळा शांत झाल्यानंतर ज्वालारूपानेंच पुनः दुसऱ्या दिवशीं वृद्धिंगत होतात, आणि देवत्वाप्रत पावून अग्नीचे आईबाप जे द्यावापृथिवी, त्यांजमध्यें आपलें तेजःपुंज स्वरूप प्रगट करितात.'

या ऋचेंत प्रथम अर्धात ज्वाला ह्या अग्नीच्या स्त्रिया होत असें जाणविलें आहे. परंतु उत्तरार्धामध्यें ज्वालांविषयीं तसला निर्देश नसून त्या केवळ ज्वाळा होत असें जाणविलें आहे. आणि त्या अग्नि विझाल्यावर शांत होतात अथवा मरतात, आणि दुसरे दिवशीं अग्नीला पेटविलें म्हणजे त्याहि पुनः वाढतात, आणि पहांटेस पृथिवी आणि द्युलोक यांचा उदय होतांच आपलें दिव्यरूप प्रगट करितात. 'पित्रोः' याजबरोबर 'अग्नीचे' (अग्नेः) अशा अर्थाचा कांहींच शब्द नसतां 'द्यावापृथिवी' असा अर्थ घ्यावा लागतो ही अडचण आहे असें नाहीं. सर्व विश्वाचे आईबाप म्हणून द्यावापृथिवींस 'अमुकाचे' असें न म्हणतां) केवळ 'आईबाप' असें म्हणण्याची चाल वेदांत आहे. ऋ. १. १६४.८ आणि त्याजवरील भाष्य पहा. पण ती अडचण दुर्निवार्य दिसत नाहीं.

'निरनिराळ्या पडून राहिलेल्या'= 'विष्टिरः.' सायणांनीं येथें 'संस्तिरः' आणि 'विष्टिरः' हीं अग्निशब्दाचीं पुंल्लिंगी एकवचनी विशेषणें केलीं आहेत, पण ऋ. २. १३. १० याजवरचें सायणभाष्य पाहिल्यावर आमचा अर्थ सप्रमाण आहे असें दिसून येईल.

'देवत्वाप्रत'='देव्यम्.' ऋ. ४.३६. १ आणि त्याजवरील सायणभाष्य पहा.

एकंदरींत ही ऋचा दुर्बोध आहे यांत संशय नाहीं. परंतु पुढच्या ऋचे-

तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्मम्रुषीः प्रायवे पुनः ।
तासां जरां प्रमुञ्चन्नेति नानदद्सुं परं जनयंजीवमस्तृतम् ॥८॥

तम् । अग्रुवः । केशिनीः । सम् । हि । रेभिरे । ऊर्ध्वाः । तस्थुः । मम्रुषीः । प्र । आयवे । पुनरिति ।
तासाम् । जराम् । प्रऽमुञ्चन् । एति । नानदत् । असुम् । परम् । जनयन् । जीवम् । अस्तृतम् ॥ ८ ॥

भाषायाम्.

८. केशिनीः (=केशिन्यः=दीर्घकेशोपेता) अग्रुवः (=ज्वालारूपा युवतयस् तं सं रेभिरे हि (=अग्निमालिङ्गितवत्यो हि) । [तदनन्तरं] मम्रुषीः (=मम्रुष्यः= अङ्गारभावमापन्नास्) [ता] आयवे (=अग्नेरर्थं) पुनः (=पुनरपि) ऊर्ध्वाः प्र तस्थुः (=ऊर्ध्वमुखा उन्नताः प्रतस्थिरे=उत्थाय तस्थुः) । [सोपि] तासां जरां प्रमुञ्चन् (=तासां ज्वालानां वयोहानिमपहरन्) [अपि च] परम् (=उत्कृष्टं) जीवं (=जीवधारणसमर्थम्) अस्तृतम् (=अहिंसितम्=अहिंसितव्यम्) असुं (=प्राणं) जनयन् (=पुनरपि तासूत्पादयन्) नानदत् एति (=ध्वनिं पुनःपुनः कुर्वन्नेति= आगच्छति=भुगुभुगुध्वनिं कुर्वाणः पुनरप्यागत्य मृतासु तासु ज्वालारूपासु युवतिषु प्राणमुत्पाद्य ता अजराः करोति) ॥

केशिनीः केशस्थानीयोर्ध्वभाविकार्ष्ण्योपेता ज्वालाः सं रेभिरे हि । परिरम्भं कुर्वन्ति खलु ।...... आयव आगच्छतेऽग्नये भर्त्रे पुनः स्वोपद्रवमजानत्य ऊर्ध्वाः प्रतस्थुः। ऊर्ध्वमुखा उन्नताः प्रतस्थिरे । मृतप्राया अपि प्रत्युत्थानं कृतवत्य इत्यर्थः । एवं कृतवतीषु सतीषु स भर्ताग्निस्तासां ज्वालानां जरां वयोहानिं प्रमुञ्चन् प्रकर्षेण मोचयन् नानदत् जरापरिहाराय मन्त्रयन्निवात्यर्थं शब्दयन् ।...... एति । गच्छति । तासां ज्वालानां संनिधिं प्राप्नोति । यथा लोके काश्चन रमण्यो रमणेन सह निर्भरं क्रीडित्वा पश्चात्प्रोषिते तस्मिन्विरहेण जीर्णा म्रियमाणाः पश्चात्तस्मिन्नागते सति स्वदौर्बल्यमगणयित्वा संतोषेण परिष्वङ्गाय चेष्टन्ते स भर्ता मन्त्रोच्चारणेन जरामपनीयोपचितप्रदानेन प्राणयन् रक्षतीत्ययं भावोत्रानुसंधेयः । इति सायणः ॥

वरून इचा भावार्थ उघड होतो.

वृत्तसुखार्थ 'देव्यं'च्या ठिकाणीं 'देविअं' आणि 'पित्रोः'च्या स्थळीं 'पितरोः' असें वाचलें पाहिजे.

८. त्याला त्या लंबकेशी तरुण स्त्रिया आलिंगन देतात. [आणि] त्या मेलेल्या स्त्रिया अग्नीकरितां पुनः उठून उभ्या राहतात. त्यांचें म्हातारपण घालवून [आणि] त्यांजमध्यें उत्तम, अक्षत, आणि सजीव प्राण उत्पन्न करून हा अग्नि ध्वनि करीत करीत येतो.

8. The long-haired damsels embraced him. [Then though] dead they stood erect again for Agni. Rumbling he comes, ridding them of [their] old age [and] creating [in them] an excellent, lively, [and] invincible breath.

८. 'अग्नीच्या ज्या ज्वाला, त्याच कोणीएक सुंदर आणि लांब केशांच्या स्त्रिया, त्या अग्नीला आलिंगन देतात, आणि म्हाताऱ्या होऊन मग मरतात. म्हणजे अग्नि शांत झाल्यावर मेल्यासारिख्या होतात. दुसऱ्या दिवशीं अग्नीला समिद्ध केलें म्हणजे तो त्यांला पुनः जीवंत करून त्यांस पुनः तरुण करितो' असा भावार्थ.

'पुनः उठून उभ्या राहतात'='पुनः ऊर्ध्वाः प्र तस्थुः.' म्हणजे अग्नि विझून गेला म्हणजे, ज्वाळा नाहींशा होऊन त्यांचे केवळ निखारे अथवा ऊन ऊन कोळसे किंवा राख राहते. त्याच अग्नीला दुसरे दिवशीं प्रदीप्त केलें म्हणजे त्याच ज्वाळा जणुं पुनः उठून उभ्या राहिल्याप्रमाणें दिसतात.

'ध्वनि करीत करीत येतो'=' नानदत् एति.' सायणाचार्य मेलेल्या ज्या ज्वालारूप स्त्रिया, त्यांस उठविण्याकरितां मन्त्रध्वनि करीत करीत, असा अर्थ करितात. तो भाषेखालीं उतरून घेतलेला पहा.

अधीवासं परि मातू रिहन्नह तुविग्रेभिः सत्वभिर्याति वि ज्रयः ।
वयो दधत्पद्वते रेरिहत्सदानु श्येनी सचते वर्तनीरह ॥ ९ ॥

अधीवासम् । परि । मातुः । रिहन् । अह । तुविऽग्रेभिः । सत्वऽभिः ।
याति । वि । ज्रयः ।

वयः । दधत् । पत्ऽवते । रेरिहत् । सदा । अनु । श्येनी । सचते ।
वर्तनिः । अह ॥ ९ ॥

भाषायाम्.

९. मातुः (=पृथिव्या) अधीवासम् (=उपर्याच्छादनस्थानीयं तृणगुल्मौषध्यादिकं) परि रिहन् (=परितो लिहन्) तुविग्रेभिः सत्वभिः (=प्रभूतं शब्दयद्भिः प्राणिभिः) [सह] ज्रयः वि याति अह (=आरण्यं स्थानं विभिद्य गच्छति=अरण्यसंबन्धिषु स्थानेषु मध्ये गच्छतीति प्रसिद्धम्)—सदा (=नित्यं) रेरिहत् (=अत्यर्थं लिहन्=दहन्) [तथा कृत्वा च] वयः पद्वते दधत् (=पादचारिभ्यः प्राणिभ्योन्नं ददत्) [याति]। श्येनी वर्तनिः (=कृष्णा पदवी) [तम्] अनु सचते अह (=अग्निमनुगच्छति=अग्नेः पश्चात्कृष्णपथस्तिष्ठतीति प्रसिद्धम्) ॥

दावाग्निः स्तूयते । ...... पद्वते पादवते द्विपदे चतुष्पदे च वयोन्नं तत्तदुचितं दधत् ददत् । विवने दावानले भीत्या पलायमानान् प्राणिनो व्याघ्रादयो भक्षयन्तीति प्रसिद्धम् । किं कुर्वन् । सदा सर्वदा तृणादिकं रेरिहत् दहन् । किंच श्येनी श्यामवर्णा वर्तनिर्मार्गा वियान्तमनु अनुक्रमेण सचते सेवते । यत्र यत्राग्निर्गच्छति तत्र तत्र मार्गोपि कृष्णो भवति । अहेति प्रसिद्धौ । इति सायणः ॥

९. आईचें प्रावरण चाटीत चाटीत [अग्नि] मोठ्यानें ओरडणाऱ्या प्राण्यांसह [अरण्य]प्रदेशामधून चालतो. [तो] नित्य चाटीत चाटीत जाऊन पादचारी [प्राण्यां]ला अन्न देत देत [चालतो]. काळा मार्ग [अग्नीच्या] पाठीमागें नित्य राहतो.

9. He passes through tracts, as is well known, licking the garment of [his] mother [and] [accompanied] by the loudly crying animals ; [passes] always licking violently [and] giving food to creatures moving on feet. A dark track, as is well known, follows [him].

---

९. वरच्या मंत्रांत वेदीवर वरीं नित्य पेटविला जाणाऱ्या अग्नीविषयीं सांगितलें. यांत दावाग्नीविषयीं, म्हणजे अरण्यांत जो वणवा पेटतो, त्याजविषयीं स्तुति आहे.

' अग्नीची आई जी पृथिवी, तिच्या आंगावरचें वस्त्र, म्हणजे गवत, झुडपें वगैरे जीं आहेत तीं जाळीत जाळीत तो जातो, आणि मोठ्या अरण्यप्रदेशांस विभागून जणुं चालतो. तो जसजसा जातो, तसतशीं अरण्यांतील श्वापदेंहि पळतात. तेव्हां व्याघ्रादिक प्राण्यांला अन्न पुष्कळ मिळतें. अग्नि ज्या ज्या मार्गानें जातो, तो तो मार्ग काळा होत असतो हें तर प्रसिद्ध आहे. '

' आईचें '=' मातुः. ' द्यावापृथिवींला, म्हणजे द्युला आणि पृथिवीला अग्नीचीं आईबापें असें वेदांत म्हणतात. कितीएक पाश्चात्त्य विद्वान् येथें आई म्हणजे ' अरणी,' कीं ज्यांत अग्नीला मंथून उत्पन्न करितात ती, असें समजतात; पण येथें सायणाचाच अर्थ अधिक योग्य दिसतो.

' चाटीत चाटीत '=' रिहन्. ' म्हणजे जाळीत जाळीत.

' [अरण्य]प्रदेशामधून ' = ' विव्रयः. ' ' व्रयः' शब्दाचा असा अर्थ सप्रमाण आहे अशाविषयीं ऋ. ६. ६. ६ आणि त्याजवरील सायणाचें भाष्य पहा.

' पादचारी प्राण्यांला'=' पद्वते. ' म्हणजे व्याघ्रादिकांला असें सायणानुसारें समजणें आहे.

' उत्सर्जन ' आणि ' उपाकर्म ' अथवा ' श्रावणी ' म्हणून जी करितात, त्यांत हा मंत्र म्हणतात.

अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान्वृषभो दमूनाः ।
अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः ॥ १० ॥ ६ ॥

अस्माकम् । अग्ने । मघवत्ऽसु । दीदिहि । अध । श्वसीवान् । वृषभः । दमूनाः ।
अवऽअस्य । शिशुऽमतीः । अदीदेः । वर्मऽइव । युत्ऽसु । परिऽजर्भुराणः ॥ १० ॥ ६ ॥

भाषायाम्.

१०. हे अग्ने, अस्माकं मघवत्सु (=यजमानेषु मध्ये=यजमानानां गृहेषु) दीदिहि (=प्रकाशस्व) । अध (=अथ=अनन्तरं) श्वसीवान् (=श्वसनवान्=ज्वालाभिश्चेष्टावान्) वृषभः (=सेचनसमर्थः=शौर्योपेतो) दमूनाः (=गृहमित्रो) [भव] । शिशुमतीः (=वत्सवतीर्) [गा] अवास्य (=अवक्षिप्य=दत्त्वा) अदीदेः (=विशेषेण प्रकाशस्व) । [अपि च] युत्सु वर्मेव (=संग्रामेषु यथा कवचं परिजर्भुराणं भवति तथा) परिजर्भुराणः (=अतिशयेन शत्रूणां पुनः पुनः परिहर्ता) [भव] ॥

मघवत्सु अस्माकं संबन्धिषु अन्नवत्सु यागेषु गृहेषु वा ...... । शिशुमतीरवास्य । शिशुशब्देन तदवस्था लक्ष्यते । शैशववतीर्ज्वाला अपक्षेप्य विहायादीदेः । भृशं दीप्यस्व । इति सायणः ॥

आणि त्याप्रमाणें ‘ अन्त्येष्टि ’ अथवा मेलेल्या मनुष्याचे दिवस करितात त्यांतहि ‘ हतवस्त्रधारण ’ म्हणजे तोडलेलें वस्त्र नेसणें म्हणून भाग असतो तो करिते वेळेस हा मंत्र म्हणतात. त्याचें कारण ‘ वास ’ हीं अक्षरें यांत आलीं आहेत, आणि ‘ वासस् ’ म्हणजे वस्त्र !

वृत्तासाठीं ‘ सदा । अनु ’ असें वाचावें.

